त्रिःसप्तकृत्वो जगतीं जिगाय कृत्वाददौ कश्यपाय प्रचण्डः ।
स जामदग्न्योऽभिजनस्य गोप्ता हिरण्य गर्भोऽसुराहा प्रपातु ।।११
चतुष्प्रकारं च वपुर्य आद्यं हैरण्यगर्भं प्रतिमान लक्ष्यम् ।
रामादि रूपैबहुरूपभेदं चकार सोऽस्मानसुरान्तकोऽव्यात् ।।१२
चाणूरकंसासुरदर्पभीतेः भीतामराणामभयाय वेदः ।
युगे युगे वासुदेवी बभूब कल्पे भवत्यद्भुतरूपकारी ।।१३
युगे युगे कल्कि नाम्ना महात्मा वर्णस्थितिं कर्त्तुमनेकरूपः ।
सनातनो ब्रह्ममयः पुरातनो न यस्य रूपं सुरसिद्धदैत्याः ।।१४

जो आद्य महात्मा पृथिवी का उद्धार करने के लिये महावराह का स्वरूप धारण करके तलातल में प्रवेश कर गये थे—जो सुरासुर और सिद्धों के समुदायों के द्वारा यज्ञ के अङ्ग की संज्ञा वाले हुए थे। वे ही दैत्यों के विनाशक पुराण पुरुष मेरी रक्षा करें ।। ८ ।। जो यह नृसिह के स्वरूप वाले हुए थे और जो योगिवर भीम हुए थे, जिनका मुख महान् कराल था जिनका कनक के अग्रभाग के समान वर्ण था वे वराशय और असुरों के अन्त करने वाले हैं वे हमारी रक्षा करें ।।९।।

Digitization by Arya Samaj Charitable Foundation, Chennai

जिसने राजा बलि के मख का ध्वंस किया था—जो अप्रमेय हैं और जो योगात्मक योग के शरीर को धारण करने वाले स्वरूप के धारी हैं और वे दण्ड काष्ट तथा दण्ड के लक्षण वाले हैं और जिसने महान् बनकर सम्पूर्ण क्षिति का समाक्रमण किया था वे देवेश्वर हमारा परित्राण करें ॥ १० ॥ इस बार इस जगत् को जीत लिया था और प्रचण्ड रूप वाले ने उस भूमि को कश्यप ऋषि को दान कर दिया था। यह परशुरामजी का अवतार था जिन्होंने इक्कीस बार पृथ्वी को क्षत्रियों से रहित कर दिया था। वह जमदग्नि ऋषि के पुत्र का पुत्र थे जो अभिजन के रक्षा करने वाले थे। वे हिरण्य गर्भ असुरों के हनन करने वाले हमारी रक्षा करें ॥ ११ ॥ जो आद्य चार प्रकार में वपु के धारी थे और हिरण्य गर्भ प्रतिमान लक्ष्य थे और श्रीराम आदि रूपों के द्वारा बहुत रूपों के भेद को कर दिया था वह असुरों के अन्त करने वाले प्रभु हमारी रक्षा करें ।: १२ ॥ चाणूर कंस आदि असुरों के दर्प के भय से डरे हुए देवों के अभय के लिये जो जानते थे और युग-युग में वासुदेव हुए थे और कल्प में अद्भुत रूप करने वाले होते हैं ॥ १३ ॥ युग-युग में कल्कि के नाम से महात्मा वर्णों की स्थिति करने के लिये अद्भत रूपों के करने वाले हैं। यह सवातन ब्रह्ममय है जिनके रूप को सुर-सिद्ध और दैत्य कोई भी नहीं देखते हैं ॥१४॥

पश्यन्ति विज्ञान गतिं विहाय अतोयमेनापि समर्च्चयन्ति ।
मत्स्यादि रूपाणि चराणि सोऽव्यात् ॥१५
नमोनमस्ते पुरुषोत्तमाय पुनश्च भूयोऽपि नमो नमस्ते ।
नमोनमः कारणकारणाय नमस्व मां मुक्तिपदं नमस्ते ॥१६
एवं नमस्यतस्तस्य महर्षेर्भावितात्मनः ।
प्रत्यक्षताङ्गतो देवः स्वयं चक्रगदाधरः ॥१७
तं दृष्ट्वा तस्य विज्ञान निस्तरङ्गं स्वदेहतः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

उत्तस्थौ सोऽपि त्वं लब्धा तस्मिन् ब्रह्मणि शाश्वते ।
लयं जगाम देवात्मन्य पुनर्भव संज्ञिते ।।१८

अतएव विज्ञान की गति का परित्याग करके यम के द्वारा भी इन्हीं का समर्चन किया करते हैं। चरणतस्य आदि रूप हमारी रक्षा करें ।। १५ ।। पुरुषोत्तम भगवान आपके लिये बारम्बार नमस्कार है और फिर भी आपके लिये बारम्बार नमस्कार है कारणों के भी कारण के लिये बारम्बार नमस्कार है। आप कृपा करके मुझको मुक्ति का पद दीजिए। आपके लिये नमस्कार है ।। १६ ।। भावित आत्मा वाले महर्षि उसको इस रीति से प्रणाम करते हुए के सामने देवेश्वर चक्र और गदा को धारण किए हुए स्वयं प्रत्यक्षता को प्राप्त हो गये थे अर्थात् साक्षात् रूप से सामने प्रकट हो गये थे ।।१७।। उनका दर्शन प्राप्त करके उसके अपने देह से विज्ञान की तरङ्ग उठी थी और वह भी उनको प्राप्त करके उन शाश्वत ब्रह्म में लय को प्राप्त हो गया था जो कि देवात्मा अपुनर्भव संज्ञा वाले थे ।।१८।।

१६—सरमोपाख्यन

तदा दुर्वाससा शप्तो देवराजः शतक्रतुः ।
वसिष्यसि त्वं मर्त्येषु सुप्रतीक सुतेन तु ।।१
उत्सादितो दिवो मूढत्येवमुक्तस्तु भूधरः ।
इन्द्रो मर्त्यमुपागम्य सर्वदेवसमन्वितः ।।२
किं चकार च तस्मिन्स्तु दुर्जये च नियातिते ।
परमेष्ठिना भगवता तेन योग विदुत्तमौ ।।३
स्वर्गे विद्युत्सुविद्युच्च तौ च किं चक्रतुस्तदा ·
एतन्मे संशयं देव कथयस्व प्रसादतः ।।४

Digitization by Arya Samaj Charitable Foundation, Chennai

दुर्जयेन जितो धात्रि देवराजः शतक्रतुः ।
भारतेहि तदा वर्षे वाराणस्यां तु पूर्वतः ॥५
आश्रित्य संस्थितौ देवैः सह यक्षमहोरगैः ।
विद्युत्सुविद्युच्च तदा योगमास्थाय शोभने ॥६
दीर्घताप ज्वरं वायुकर्मयोगेन संश्रितौ ।
लोकपालाय तं कृत्स्नं चक्रतुर्योगमायया ॥७

उस समय मे दुर्वासा मुनि के द्वारा देवराज इन्द्र को शाप दिया गया था। शाप का स्वरूप यह था कि तू जाकर मनुष्यों में निवास करेगा। सुप्रतीक के सुत के द्वारा उत्साहित किया गया था और दिव-लोक से मूढ़—इस प्रकार से भूधर कहा गया था। इन्द्र समस्त सुरगणों से समन्वित होकर उसने मर्त्यलोक में प्राप्त होकर उस दुर्जय के निया-तित हो जाने पर क्या किया था। भगवान् परमेष्ठी के साथ उसका योग हुआ था। विद्वानों में उत्तम स्वर्ग में विद्युत और सुविद्युत इन दोनों ने उस समय में क्या किया था? यह हे देव! हमारे हृदय में संशय है। आप परम प्रसन्नता से इस संशय को निवारित कीजिए और कहिए ॥ १—४ ॥ हे धात्रि! दुर्जय ने देवराज इन्द्र को युद्ध में जीत लिया था। उस समय में भारतवर्ष में पूर्व में वाराणसी में समा-श्रय ग्रहण करके देवों और यक्षों तथा महोरगों के साथ संस्थित हो गये थे। हे शोभने! उस समय में विद्युत और सुविद्युत योग में समा-स्थित होकर वायु कर्म के योग के द्वारा दीर्घ ताप ज्वर में संश्रित हो हो गये थे। उस सबको लोकपाल के लिये योग माया से कर दिया था ॥५—७॥

तं दुर्जयं मृतं श्रुत्वा समुद्रान्तः स्थितं सदा ।
आनीय च तुरंगं तु देवान्प्रति विजग्मतुः ॥८
आगत्य तौ तदा दैत्यो महासैन्येन पर्वतम् ।
हिमवन्तं समाश्रित्य संस्थितौ तु बभूवतुः ॥९

Digitization by Arya Samaj Charitable Foundation, Chennai

देवा. अपि महत्सैन्यं संहृत्य कृतदंशिताः ।
मन्त्रयाञ्च क्रूर व्यग्रा ऐन्द्र पदमभीप्सवः ॥१०
अब्रवीत्तत्र देवानां गुरुराङ्गिरसो मुनिः ।
गोमेधेन यजध्वं वै प्रथमं तदनन्तरम् ॥११
यष्टव्यं क्रतुभिः सर्वैरेषा स्थितिरथामराः ।
उपदेशो मया दत्तः क्रियतां शीघ्र एष वै ॥१२
एवमुक्तास्तदा देवा गाः पशूंश्चानु कल्प्यते ।
मुमुचुश्चारणार्थाय रक्षार्थं सरमां ददुः ॥१३
ताश्च गावो देवशुन्या रक्ष्यमाणा धराधरे ।
तत्र जग्मुस्तदा गावश्चरन्त्यो यत्र तेऽसुराः ॥१४

उस दुर्जय राजा को मृत हुआ सुनकर जो समुद्र के अन्त पर्यन्त सदास्थित था उसने तुरङ्ग को लाकर देवों के प्रति वे चले गये थे ।।८।। उस समय में वे दोनों दैत्य समागत होकर महती सेना के सहित हिमवान् पर्वत का समाश्रय गृहण करके संस्थित हो गये थे ।।-।। देवों ने भी उस महान् सेना का संहार कर दिया था और देशिता प्राप्त करली थी इन्होंने अव्यग्र होकर मन्त्रणा की थी और ये सब इन्द्र के पद प्राप्त करने के इच्छुक थे ।।१०।। यहाँ पर उस समय में आङ्गिरस महा गुरु ने जो देवगणों के थे देवों से कहा था—दे अमरो ! सर्व प्रथम यदि ऐसा ही चाहते हैं तो गौ मेध यज्ञ का यजन करो । इसके अनन्तर सब क्रतुओं के द्वारा यजन करना चाहिए—यह स्थिति है ।।११।।१२।। मैंने यह आप लोगों को उपदेश दे दिया है। आपको यह शीघ्र हीं करना चाहिये । उस अवसर में इस प्रकार से देवगण से कहा गया था । गौ और पशुओं की अनुकल्पना की जाती है । उन्होंने चारण के लिये उनको छोड़ दिया था और उनकी रक्षा करने के लिये सरमा को दे दिया था । ।।१३।। वे गौएे देवों से शून्य थी जो कि धराधर में रक्ष्यमाण थीं । उस समय में चरण करती हुई वे गायें वहाँ पर पहुँच गयी थीं जहाँ पर वे असुर स्थित थे ।।१४।।

Digitization by Arya Samaj Charitable Foundation, Chennai

ते च गावस्तु ता दृष्ट्वा शुक्रमूचुः पुरोहितम् ।
पश्य त्वं देव गा ब्रह्मंश्चार्यन्ते रक्षमाणया ।
देवशुन्या सरमया वद किं क्रियतेऽधुना ॥१५
एवमुक्त स्तदा शुक्रः प्रत्युवाचासुरांस्तदा ।
एता गा ह्रियतां शीघ्रमसुरा मा विलम्बथ ॥१६
एवमुक्ता स्तदा दैत्या जह्रुस्ता गा यदृच्छया ।
हृतासु तासु सरमा मार्गान्वेषण तत्परा ॥१७
अपश्यत्सा दितेः पुत्रैर्नीता गावो धराधरे ।
दैत्येरपि शुनी दृष्ट्वा दृष्टमार्गा विशेषतः ॥१८
दृष्ट्वा ते तां च सरपूमां सामपूर्वमिदं वचः ।
आसां गवां तु दुग्ध्वैवं क्षीरं त्वं सरमे शुभे ॥१९
पिब स्वैरमिति प्रोक्त्वा तस्यै तद्ददुरञ्जसा ।
दत्त्वा तु क्षीरपानं त तस्यै ते दैत्यनायकाः ॥२०
मा भद्रे देवराजाय गास्त्विमा विनिवेदय ।
एवमुक्त्वा ततो दैत्या मुमुचुस्तां शुनीं वने ॥२१

उन असुरों ने उन गौओं को देखकर पुरोहित शुक्रदेव से कहा था—हे देव ! आप देखिये हे ब्रह्मन् ! ये गायें रक्षमाण के द्वारा यहाँ पर चराई जा रही हैं। ये इस समय में देवगणों से रहित हैं। इस सरमा के द्वारा आप ही बतलाइए अब क्या किया जाता है ॥१५॥ इस तरह से जब असुरों के गुरु शुक्राचार्य से कहा गया था तब उन्होंने उन असुरों को उत्तर दिया था। हे असुरो ! इन गायों का आप लोग हरण कर लीजिए और शीघ्रता करिए—इस कार्य में विलम्ब न करें ॥१६॥ इस प्रकार से जब असुरों से गुरुदेव ने कहा यो उन दैत्यों ने यह इच्छा से उन गौओं का हरण कर लिया था। उन गौओं के हरण किए जाने पर वह सरमा मार्ग के अन्वेषण में तत्पर हो गया था ॥१७॥ उसने देखा था कि दिति के पुत्रों ने उस पर्वत पर गौओं को ले लिया है। दैत्यों ने

Digitization by Arya Samaj Charitable Foundation, Chennai

भी उस शुनी को देखकर और विशेष रूप से देखे हुए मार्ग वाली को देखकर उन्होंने उस सरमा से साम पूर्वक यह वचन कहा था। दैत्यों ने कहा—हे शुभे सरमे ! इन गौओं का दोहन करके इनका दूध आप पीजिए और स्वतन्त्रता पूर्वक दुग्ध का पान करिए—यह कहकर तुरन्त ही उसको वह दे दिया था। क्षीर का पान देकर उन दैत्य नामकों ने उससे कहा था—हे भद्रे ! आप इन गौओं के विषय में देवराज से कुछ भी न कहें। इस प्रकार से कहकर उन दैत्यों ने उस शुनी को वन में छोड़ दिया था ॥१८—२१॥

तैर्मुक्ता सा सुरांस्तूर्णं जगाम खलु वेपती।
नमश्चक्रे च देवेन्द्रं सरमा सुरसत्तमम् ॥२२
तस्याश्च मरुतो देवा देवेन्द्रेण निरूपिताः।
गूढं गच्छत रक्षार्थं देवशुन्या महावलाः ॥२३
इत्युक्तास्तेन सूक्ष्मेण वपुषा जग्मुरञ्चसा।
तेऽप्यागम्य सुरेन्द्राय नमश्चक्रुर्धराधरे ॥२४
तान्देवराजः पप्रच्छ गावः किं सरमेऽभवन्।
एवमुक्ता तु सरमा न जानामीति चाब्रवीत् ॥२५
तत इन्द्रो रुषा युक्तो यज्ञार्थमुपकल्पिताः।
गावः क्वचेति मरुतः प्रोवाचेदं शुनीकथम् ॥२६
एवमुक्तास्तु मरुतो देवेन्द्रेण धराधरे।
कथयामासुरव्यग्राः कर्म तत्सरमाकृतम् ॥२७
तत इन्द्रः समुत्थाय पदा सन्ताड्यच्छुनीम्।
क्रोधेन महताविष्टो देवेन्द्रः पाकशासनः ॥२८

उन दैत्यों के द्वारा मुक्त हुई वह तुरन्त ही काँपती हुई सुरों के समीप में चली गयी थी। उसने देवराज को नमस्कार किया था अर्थात् उस राजा ने देवों में श्रेष्ठ देवेन्द्र के समक्ष में नमन किया था ॥२२॥ देवेन्द्र ने उसकी रक्षा के लिए मरुत देवों को निरूपित कर दिया था

Digitization by Arya Samaj Charitable Foundation, Chennai

और उनको यह आदेश दिया था कि वे छिपकर ही उसकी रक्षा के लिए जावें क्योंकि यह अबला देवों से शून्य है ॥ २३ ॥ इन्द्रदेव के द्वारा इस तरह से कहे गये वे भी तुरन्त ही सूक्ष्म वपु धारण करके वहाँ गये थे । उन्होने भी समागत होकर उस पर्वत पर सुरेन्द्र के लिए प्रणाम किया था ॥ २४ ॥ देवराज ने उनसे पूछा था—गौऐं कहाँ हैं और सरमा को क्या हो गया हैं । इस प्रकार से जब उससे कहा गया तो सरमा ने यही कहा था मैं नहीं जानती हूँ ॥ २५ ॥ उस समय में देव-राज बहुत ही क्रोधयुक्त हो गये थे और उन्होंने कहा—ये गौऐं तो यज्ञ के लिए उपकल्पित हैं और ये गायें कहाँ हैं । शुनी ने मरुतों से यह कैसे कहा था ॥ २६ ॥ इस तरह से देवेन्द्र के द्वारा मरुतों से कहा गया था तो उस पर्वत पर उन्होंने अव्यग्र होकर उस सरमा के द्वारा किये हुए कर्म को कह दिया था ॥ २७ ॥ तब देवेन्द्र ने समुत्थित होकर उस शुनी को अच्छी तरह से प्रताड़ित किया था । वह पाक शासन बड़े भारी क्रोध से आविष्ट होगये थे ॥ २८ ॥

क्षीरं पीतं त्वया मूढे गावस्ताश्र्वासुरैः हृताः ।
एवमुक्त्वा पदा तेन ताडिता सरमा धरे ॥२९
तस्येन्द्र पादघातेन क्षींर वक्तृात् प्रसुसुवे ।
स्रवता तेन पयसा सा शुनी यत्र गाभवत् ॥३०
जगाम तत्र देवेन्द्रः सहसैन्यस्तदा धरे ।
अपश्त्तत्र देवेन्द्रस्तागा दैत्येरुपाहृताः ॥३१
चक्रुर्ये पालनं दैत्यास्ते दैत्या वलिनोभृशम् ।
तैः सैन्येर्निहिताः सद्यस्तत्यजुर्गाः स्वमूर्त्तिभिः ॥३२
सामन्तैश्च सुरेन्द्रोऽथ वृतः परम हर्षितैः ।
ताश्च लब्ध्वा महेन्द्रस्तु मुदा परमया युतः ॥३३
चकार यज्ञान्विविधान् सहस्रानपि स प्रभुः ।
क्रियमाणैस्ततो यज्ञैः ववृधेन्द्रस्य तद बलम् ॥३४

Digitization by Arya Samaj Charitable Foundation, Chennai

वर्द्धितेन वलेनेन्द्रो देवसैन्यमुवाच ह ।
सन्नह्यन्ता सुराः शीघ्रं दैत्यानां वधकर्मणि ॥३५

देवेन्द्र ने सरमा ने कहा—से मूढ़े ! तूने तो गौओं का दूध पिया और उन गौओं का असुरों ने हरण कर लिया है। हे चरे ! इस तरह से कहकर उस देवेन्द्र नेउस सरमा को ताड़ित किया था। उस इन्द्र ने पद के घात से मुख से क्षीर प्रसूत हुआ था। सुवले हुए उस पय से वह शुभी जहाँ पर न रही थी ॥२६॥३०॥ हे धरे ! उस समय में इन्द्र देव अपनी सेना के सहित वहाँ पर गया था। देवेन्द्र ने वहाँ पर देखा था कि वे गौऐं दैत्यों के द्वारा उपाहृत हुई थीं ॥३१॥ जिन दैत्यों ने पालन किया था वे दैत्य बहुत ही अधिक वली थे। उन सैनिकों के द्वारा वे निहत हुए और तुरन्त ही उन्होंने अपनी मूर्त्तियों से गायों का त्याग कर दिया था ॥ ३२ ॥ इसके अनन्तर सुरेन्द्र परम हर्षित सापन्नों के साथ समन्वित होकर और गायों को प्राप्त करके सुरेन्द्र ने अनेक प्रकार के यज्ञों को जो संख्या में सहस्रों ही थे उस प्रभु ने किया था ॥ ३३ ॥ उन किये जा रहें यज्ञों से द्वारा इन्द्र देव का वल गया बढ़ था ॥३४॥ बर्धित हुए बल से युक्त देवेन्द्र देव से बोला था—सब सुरगण दैत्यों के बध के कार्य में शीघ्र ही सम्नद्ध हो जावें ॥ ३५ ॥

एवमुक्तास्वता देवाः सन्नद्धास्ततक्षगेऽभवन् ।
असुराणामभावाय जग्मुर्देवाः सवासवाः ॥३६
गत्वा तु युयुधुस्तुर्णं विजिग्युस्त्वासुरीं चमूम् ।
जिताश्च देवरैसुरा हतशेषा धराधरे ॥३७
ममज्जुःसागर जले भयत्रस्ता विचेतसः ।
देवराजोऽपि त्रिदिवं लोकपालैः समं धरे ॥३८
आरुह्य बुभुजे प्राग्वत् सदेवो देवराट् विभुः ।
य एवं शृणुयान्नित्यं सरमाख्यानमुत्तमम् ॥३९
सगोमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

भ्रष्टराज्यश्च यो राजा शृणोतीदं समाहितः।
स देवेन्द्र इव स्वर्गं राज्यं स्वं लभते नरः ॥४०

इस तरह से कहे गये समस्त देवगण उसी क्षण में सम्भद्ध हो गये थे। असुरों के अभाव करने के लिये इन्द्र के सहित सब देवगण गये थे ॥ ३६ ॥ और उन्होंने गमन करके शीघ्र ही युद्ध किया था और उन असुरों की सेना पर विजय प्राप्त करली थी। और जो मरने से बच गये थे वे उसी पर्वत पर भय से त्रस्त होकर अचेतन होकर सागर के जल में गये थे। हे धरे ! देवराज भी लोक पालों के सहित स्वर्ग में आरूढ़ होकर देवों के साथ देवराट् विभु पूर्व की ही भाँति भोग करने लगा था ॥३७॥३८॥ जो इसका नित्य ही श्रवण किया करता है इस उत्तम सरमा के आख्यान का पठन करता है या सुनता है वह मानव गोपेध यज्ञ के फल को प्राप्त किया करता है। जिस राजा का राज्य भ्रष्ट हो गया हो वह यदि इसका समाहित होकर श्रवण करता है वह देवेन्द्र की ही भाँति स्वर्ग के राज्य का लाभ मनुष्य है ॥३९॥४०॥

१७–महातपा उपाख्यान

ये ते मणौ तदा देव उत्पन्ना नरपुंगवाः।
तेषां वरो भगवता दत्तस्त्रेतायुगे किल ॥१
राजानो भवितारो वै कथं तेषां समुद्भवः।
किं चक्रुर्वै हि ते कर्म पृथङ् नामानि शंस मे ॥२
सुप्रभो मणिजो यस्तु राजा नाम महामनाः।
तस्तोत्पत्ति शृणु त्वं भूतधारिणि ॥३
आसीद्राजा महाबाहुरादौ कृतयुगे पुरा।
श्रुतकीर्तिरिति ख्यातस्त्रैलोक्ये बलवत्तरः ॥४

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्य पुत्रत्वमायेदे सुप्रभो मणिजो धरे ।
प्रजपालेति वै नाम्ना श्रुतिकीर्तिर्महाबलः ॥५
स एकस्मिन्दिने प्रायाद्‌गहनं श्वापदाकुलम् ।
तत्रापश्यद्दवेर्द्धन्यं महदाश्रममण्डलम् ॥६
तस्मिन्महातपा नाम ऋषिः परम धार्मिकः ।
तपस्तपे निराहारो जपन्ब्रह्म सनातनम् ॥७

जो नर पुङ्गव उस समय में उस मणि से समुत्पन्न हुए थे उनको भगवान् ने त्रेता युग में वरदान दिया था कि वे सब राजा होंगे। उनका समुद्भव किस तरह से हुआ था और उन्होंने हित में क्या कर्म किया था जो पृथक् था उनके नामों को आप कृपा करके मुझे बतलाइए। ॥१॥२॥ जो मणि से उत्पन्न हुआ सुप्रभ राजा था वह महामना था हे भूतों के धारण करने वाली ! उस की उत्पत्ति का आप श्रवण करिए। ॥३॥ पुराने समय में कृत युग में एक महावाहु आदि में राजा था। वह श्रुतकीर्त्ति—इस नाम से त्रैलोक्य में विशेष अधिक बलवान् प्रसिद्ध हुआ था ॥४॥ हे धरे ! मणि से समुत्पन्न सुप्रभ वे उसके पुत्र के स्वरूप को प्राप्त किया था श्रुत कीत्ति महान् बलवान् था और प्रजपाल इस नाम वाला हुआ था ॥५॥ वह एक दिन श्रापदों से समाकुल किसी परम गहन वन में गया था। वहाँ पर उसने एक ऋषिका परम धन्य आश्रम मण्डल का अवलोकन किया था ॥६॥ उस आश्रम में एक महा तपा नाम वाले परम धार्मिक ऋषि निवास किया करते थे। वे निरन्तर निराहार रहकर सनातन ब्रह्म का जप किया करते थे ॥७॥

तत्रा सौ पार्थिवः श्रीमान्प्रवेशाय मतिं तदा ।
चकार चाविशद्राजा प्रजापालो महातपाः ॥८
एवं स राजा विविधानुपायान् वराश्रमे प्रेक्षमाणो विवेश ।
तस्मिन्प्रविष्टे तु स तीव्रतेजा महातपाः पुण्डकृतां प्रधानः ॥९
स मुनिस्तं नृपं दृष्ट्वा प्रजापालमकल्मषम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

अभ्यागतक्रियां चक्रे आसनस्वागतादिभिः ।।१०
ततः कृतासनो राजा प्रणम्य ऋषिपुंगवम् ।
पप्रच्छ वसुधे प्रश्नमिमं परम दुर्लभम् ।।११
भगवन्दुःखसंसारमग्नैः पुम्भिर्जिगीषुभिः ।
यत्कार्यं तन्ममाचक्ष्व प्रणते शंसितव्रत ।।१२
संसारार्णवमज्जमानमनुजैः पोतः स्थिरोऽति ध्रुवः-
कार्यः पूजनहोमदग्नविधिभिर्यज्ञैः समं ध्यानकैः ।
कीलैः कीलितमोक्षकैः सुरभटैरूर्ध्वं महारज्जुभिः
प्राणाद्यैरधुना कुरुष्व नृपते पोतं त्रिलोकेश्वरम् ।।१३
नारायणं नरकहरं सुरेश भक्त्या नमस्कुर्वति यो नृपेश ।
स वीत शोकः परमं विशोकं प्राप्नोति पदमव्ययं यत् ।।१४

वहाँ पर उस आश्रम में श्रीमान् राजा ने प्रवेश करने की उस समय में अपनी बुद्धि की थी । और महा तपस्त्री राजा ने प्रजा पाल ने उसमें प्रवेश किया था ।। ८ ।। इस तरह से उस श्रेष्ठ आश्रम में उस राजा ने अनेक उपायों को देखते हुए प्रवेश किया था उसके प्रविष्ट होने पर परम तीव्र तेज वाले और पुण्य कर्म करने वालों में प्रधान महा तपा मुनि ने उस नृप को देखा था कि वह प्रजापाल कल्मष से रहित है तो उस मुनि महा तपा ने आसन और स्त्रणात आदि के द्वारा उसका अभ्पणात सब क्रिया को सम्पादित किया ।। ६ ।। १० ।। इसके अनन्तर राजा ने आसन ग्रहण करके उस परश्रेष्ठ ऋषि महानया को प्रणाम किया था और हे वसुध्वे उस राजा ने परम दुर्लभ इस प्रश्न को मुनि से पूछा था ।। ११ ।। हे शंसित व्रत वाले ! हे भगवन् ! जीवने की इच्छा रखने वाले और सांसारिक दुःखों में मग्न हुए मनुष्यों का जो भो कर्म हो वह आप प्रणत हुए मुझे बतलाइए— यह आपका परम अनुग्रह मुझ पर होगा ।। १२ ।। उस महा मुनि ने राजा को इस प्रश्न का उत्तर यही दिया था कि—इस संसार रूपी महासागर में डूवते हुए मनुष्यों के लिये

Digitization by Arya Samaj Charitable Foundation, Chennai

यही निश्चित और स्थिर पार उतारने के लिये पोज (जहाज) है कि उनको ध्यान के साथ पूजा—होम—दान आदि अनेक विधि वाले यज्ञ करने चाहिए। हे नृपते ! कीलित और कीलित मोक्ष वाले सुरभरों के द्वारा ऊपर की ओर महारज्जु स्वरूप प्राणादि के द्वारा इस समय में त्रिलोकेश्वर को ही पोत बनाओ ॥ १३ ॥ हे नृपेश ! जो मानव भक्ति के भाव से नरक के हरण करने वाले सुरेश नारायण प्रभु को नमस्कार किया करता है वह वीत शोक होकर परम विशोक अव्यय पद को प्राप्त कर लिया करता है ॥ १३ ॥ १४ ॥

भगवन् सर्वधर्मज्ञ कथं विष्णुः सनातनः ।
पूज्यतेमोक्षमिच्छद्भिः पुरुषैर्वद तत्त्वतः ॥१५
श्रृणु राजन् महाप्राज्ञ यथा विष्णुः प्रसीदति ।
पुरुषाणां तथा स्त्रीणां सर्व योगीश्वरो हरिः ॥१६
सर्वे देवाः सपितरो ब्रह्माद्याश्चाण्ड मध्यगाः ।
विष्णोः सकाशादुत्पन्न इतीयं वैदिकी श्रुतिः ॥१७
अग्निस्तथाश्विनौ गौरीगज वक्तृ भुजङ्गमाः ।
कार्तिकेयस्तथादित्या मातरो दुर्गया सह ॥१८
दिशो धनपतिर्विष्णुर्यमो रुद्रः शशी तथा ।
पितरश्चैव सम्भूताः प्राधान्येन जगत्पतेः ॥१९
हिरण्लगर्भस्य तनौ सर्व एव समुद्‌वाः ।
पृथक् पृथक् ततो गर्वं वहमानाः समन्ततः ॥२०
अहं योग्यस्त्वहं याज्य इति तेषां स्वनो महान् ।
श्रूयते देवसमितौ क्षुब्धसागर सन्निभः ॥२१

राजा ने उस महा तपा मुनि से कहा था—हे भगवन् ! आप तो सभी धर्मों के ज्ञान रखने वाले हैं। यह बतलाइये कि सनातन भगवान् विष्णु का मोक्ष की इच्छा रखने वालों को किस प्रकार से पूजन किया जाया करता है ? जो मुक्ति की इच्छा रखते हैं उनके द्वारा किये

Digitization by Arya Samaj Charitable Foundation, Chennai

जाने वाला पूजन कैसा होना चाहिये—इसी का उत्तर आप कृपा करके तात्त्विक रूप से प्रदान कीजिए ॥ १५ ॥ उस महा मुनि महा तपा ने कहा था—हे राजन् ! अन आप श्रवण कीजिए कि भगवान् विष्णु किस तरह से प्रसन्न हुआ करते हैं। आप तो महान् प्रज्ञा वाले हैं। चाहे स्त्रियाँ हो या पुरुष होवें वह योगीश्वर हरि सभी के हैं ॥ १६ ॥ सभी देवगण—पितृगण और इस अण्ड के मध्य में होने वाले ब्रह्मा आदिक सभी भगवान् विष्णु के ही सकाश से उत्पन्न हुए हैं—ऐसा ही वैदिक श्रुति बतलाती है ॥ १७ ॥ अग्नि—अश्विनी कुमार—गौ की—गणेश—भुजङ्गम— स्वामीवाकार्त्तिकय—आदित्य मातृगण—दुर्गा—दिशाऐं—कुवेर—विष्णु—यम—रुद्र शशि और पितर ये सभी प्रधानता से जगत्पति से ही समुद्गत हुए हैं। ये सभी हिरण्य गर्भ के शरीर में ही समुत्पन्न होने वाले हैं। इसके अनन्तर पृथक् पृथक् गर्व को वहन करते हुए चारों ओर से हो रहे थे ॥ १८ ॥ १९ ॥ २० ॥ में योग्य हूं—आप मान्य हैं—ऐसा उनकी महान् ध्वनि हुई थी। जो उस देवों की समिति में क्षुब्ध सागर के ही समान थी ॥ २१ ॥

तेषां विवदमानानां वह्निरुत्थाय पार्थिव ।
उवाच मां यजस्वेति ध्याय तं मामिति ब्रुवन ॥२२
प्राजापत्यमिदं नूनं शरीरं मद्विना कृतम् ।
विनाशमुपपद्येत यतो नायं महानहम् ॥२३
एवमुक्ता शरीरं तु त्वक्त्वा वह्निः विनिर्ययौ ।
निर्गतेऽपि ततस्मिन् तच्छरीरं न शीर्यते ॥२४
ततोऽश्विनौ मूर्तिमन्तौ प्राणापान शरीर गौ ।
आवां प्रधानवित्थवेमूचतुर्याज्यमुत्तरौ ॥२५
एवमुक्त्वा शरीरं तु विहाय क्वचिदास्थितौ ।
तयोरपि क्षयं कृत्वा क्षींण तत्पुरमास्थितम् ॥२६
ततो वागब्रवीद् गौरी प्रधान्यं मयि संस्थितम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

साप्येवमुक्त्वा शेत्रात्तु निश्चक्राम वहिः शुभा ।।२७
तया विनापि तत्क्षेत्रं वागूनं व्यवतिष्ठत ।
ततो गणपतिर्वाक्यमाकाशाख्योऽब्रवीत्तदा ।।२८

हे पार्थिव! इस प्रकार से परस्पर में विवाद करते हुए वे स्थित थे। उसी समय में वह्नि ने उठकर उनसे अग्नि ने कहा था—तुम स्त्व मेरा यजन करो और मेरा ही ध्यान कर—यही वह अग्नि उनसे बोल रहा था आपको त्रिनाश उत्पन्न हो जायगा क्योंकि जो आप ऐसा कह रहे हैं कि मैं महान् हूँ—यह नहीं है ।। २२ ।। २३ ।। वस इतना ही कहकर उस वह्नि ने अपने शरी का त्याग कर दिया था और वह निर्णत हो गया था। उसके विनिर्गत होने पर भी उसका शरीर विनष्ट नहीं होता हैं ।। २४ ।। इसके अनन्तर अश्विनीकुमार मूर्त्तिभान् प्राण—अयान शरीर वाले समुत्थित हुए थे उन्होंने कहा था—हम दोनों ही प्रधान हैं हमारा ही यजन करो ।। २५ ।। इस प्रकार कहकर शरीर का त्याग करके वे दोनों किसी स्थान पर समास्थित हो गये थे उन दोनों का क्षय करके उनका पुर क्षीण आस्थित हो गया ।। २६ ।। इसके अनन्तर वाग् गौरी ने कहा था—प्रधानता तो मुझ में संस्थित है। उसने भी इस तरह से कहकर उस क्षेत्र से वह शुभा भी वाहिर निकल कर चली गयी थी ।२७। उसके बिना भी वह क्षेत्र वाक् से रहित व्यवस्थित हुआ था। इसके उपरान्त आकाश नामक उस समय में गणपति ने वाक्य वोला था ।२८।

न मया रहितं किञ्चिच्छरीरं स्थायि दूरतः ।
कालान्तरेत्येवमुक्त्वा सोऽपि निष्क्रम्य देहतः ।।२९
पृथग्भूतस्तथाप्येतच्छरीरं नाप्यनीनशत् ।
विनाशाख्यं च तत्तेन तथापि न विशर्यते ।।३०
सुषिरैस्तु विहीनं तु दृष्ट्वा क्षेत्रं व्यवस्थितम् ।
शरीर धातवः सर्वे ते ब्रूयुर्वाक्यमेव हि ।।३१
अस्माभिः व्यतिरिक्तस्य न शरीरस्य धारणम्

Digitization by Arya Samaj Charitable Foundation, Chennai

भवनीत्येवमुक्त्वा ते जहुः सर्वे शरीरिगः ।।३२
तैर्व्यपेतमपि क्षेत्रं पुरुषेण प्रपाल्यते ।
तं दृष्ट्वा त्वब्रवीत् स्कन्दः सोऽहङ्कारः प्रकीर्तितः ।।३३
मया विना शरीरस्य सम्भूतिरपि नेष्यते ।
एवमुक्त्वा शरीरात्तु स व्यपेतः प्रथक् स्थितः ।।३४
तेनाक्षेते तत्क्षेत्रं विना मुक्त वदास्थिमम् ।
तं दृष्ट्वा कुपितो भानुः स आदित्य प्रकीर्तितः ।।३५

मेरे बिना कोई भी शरीर दूर तक स्थाई नहीं हैं और अन्य काल में भी नहीं हैं—इतना ही यह कहकर वह भी शरीर से निकल कर पृथग् भूत हो गया था तो भी उसका शरीर विनष्ट नहीं हुआ था। और वह विनाश नाम वाला था और उसने भी अपने आप को विशीर्ण नहीं किया था ।।२९।।३०।। सुषिरो से विहीन उस क्षेत्र को व्यवस्थित देखा था। फिर शरीर की सब धातुओं ने यह वाक्य कहा था—हमारे से व्यतिरिक्त के शरीर का धारण नहीं होता है अर्थात् शरीर का रहना हमी से हुआ करता है यदि हम न हों तो यह शरीर रह ही नहीं सकता है। यह कह कर उन सबने जो शरीर धारी थे उस क्षेत्र का त्याग कर दिया था ।।३१।।३२।। उसके द्वारा व्यपेत भी इस क्षेत्र का पुरुष के द्वारा प्रतिपालित किया जाता है उसको देखकर स्कन्द ने कहा था—मैं ही अहङ्कार कीर्त्तित किया गया हूँ ।।३३।। मेरे बिना तो इस शरीर की समुत्पत्ति भी अभीष्ट नहीं हुआ करता है। इस प्रकार से कहकर वह शरीर से व्यपेत होकर पृथक् स्थित हो गया था ।।३४।। अक्षत उसके बिना भी वह क्षेत्र युक्त वह आस्थित रहा था। उसको देखकर भानु बहुत कुपित हुए थे वह आदित्य इस नाम प्रकीर्तित हुए थे ।।३५।।

मया विना कथं क्षेत्रमिमं क्षणमपीष्यते ।
एवमुक्त्वा थ यातः स तच्छरीरं न शीर्यते ।।३६
ततः कामादिरुत्थाय गणो मातृविसंज्ञितः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

न मया व्यतिरिक्तस्य शरीरस्य व्यवस्थितिः ।
एवमुक्त्वा स यातस्तु शरीरं तन्न शीर्यते ॥३७
ततो विष्णोर्मनो ब्रूयान्नायं देहो मया विना ।
क्षणमप्युत् सहेत्स्थातुमित्युक्त्वान्तर्दधे पुनः ॥३८
ततोऽब्रवीन्महादेवः अव्यक्तो भूतभावनः ।
महासंज्ञो मयाहीनं षरीरं नो भवेद्यथा ।
एवमुक्त्वा गतः शम्भुस्तच्छरीरं न शीर्यते ॥३९
प्रागवस्थं शरीरं तु दृष्ट्वा सर्वज्ञपालितम् ।
ताः क्षेत्रदेवताः सर्वा वैलक्षं भावमस्थिता ॥४०
तमेवं तुष्टुवुः सर्वास्तं देवं परमेश्वरम् ।
स्वस्थानं विविशुः सर्वास्तदा नृपतिसत्तम ॥४१
त्वमग्निस्त्वं तथा प्राणस्त्वमपानः सरस्वती ।
त्वमाकाशं धनाध्यक्षस्त्वं शमीरस्य धातवः ॥४२

मेरे बिना यह क्षेत्र किस प्रकार से एक क्षण भी व्यवस्थित रह सकता है । ऐसा कहकर वह भी चला गया था किन्तु उसका शरीर भी विशीर्ण नहीं हुआ था ॥३६॥ इसके अनन्तर मातृ विसंज्ञित कामादिगण ने उठकर कहा था—मेरे बिना इस शरीर व्यवस्थिति ही नहीं होती है । इस तरह से कहकर वह भी चला गया था और यह शरीर विनष्ट नहीं हुआ था ॥३७॥ इसके उपरान्त विषय श्रम ने कहा था—यह देह मेरे बिना नहीं रह सकता है । और एक क्षण भी स्थित रहने के लिये योग्य नहीं हो सकता है । इतना कह कर वह भी अन्तर्हित हो गया था ॥३८॥ इसके उपरान्त अव्यक्त और भूतों पर कृपा करने वाले महादेवजी ने कहा था—मैं महान् संज्ञा वाला देव हूँ मेरे बिना यह शरीर नहीं रह सकता है । इस प्रकार से कहकर शम्भुजी गमन कर गये थे और वह शरीर विशीर्ण नहीं होता है ॥३९॥ पूर्व की अवस्था में स्थित शरीर को सर्वज्ञ के द्वारा पालित देखकर सभी क्षेत्र हैनता को लक्ष भाव में समा-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्थित हो गये थे अर्थात् सबको बहुत आश्चर्य हुआ था ।।४०।। उन सबों ने उन देवेश्वर परमेश्वर का स्तवन किया था हे नृप श्रेष्ठ ! उस समय में वे सब अपने स्थान में प्रवेश कर गये थे । उन्होंने कहा था—आप ही अग्नि हैं—आप ही प्राण तथा अपान हैं—आप ही सूररजनी—आकाश—धनाध्यक्ष और आप ही शरीर की धातुऐं हैं ।।४१।।४२।।

अहंकारो भवान्देव त्वमादित्योऽष्टको गणः ।
त्वं माया पृथिवी दुर्गा त्वं दिशिस्त्वं मरुत्पतिः ।।४३
त्वं विष्णुस्त्वं तथा धर्मस्त्वं जिष्णुस्त्भं पराजितः ।
अक्षरार्थ स्वरूपेण परमेश्वर संज्ञितः ।
अस्माभिरपयातंस्तुकथमेतद् भविष्यति ।।४४
एवमत्र शरीरं तु त्यक्तमस्माभिरेव च ।
न परं भवतो देव तदत्र त्वं च पालयेः ।।४५
स्थानभंगो न नः कार्यः स्वयं सृष्ट्वा प्रजापते ।
एवं स्तुतलततो देवस्तेषां तोषं परं ययौ ।।४६
उवाच चैतान् क्रीडार्थं भवन्तोत्पादिता मया ।
कृतकृत्यस्य चैकं तु भवद्भिर्मे प्रयोजनम् ।।४७
तथा चेदप्रियं रूपे द्वे द्वे प्रत्येकशोऽधुना ।
भूतकार्येष्वमूर्तेन देवलोके तु मूर्तिना ।।४८
तिष्ठध्वमपि कालान्ते लयं त्वाविशत द्रुतम् ।
शरीराणि पुनर्नैव कर्तव्योऽहमिति क्विचित् ।।४९

उन्होंने कहा था—हे देव ! आप ही अहङ्कार हैं—आदित्य हैं और आप ही अष्टकगण हैं । आप ही माया—दुर्गा—पृथिवी हैं । आप ही दिशाऐं हैं और आप ही यरुत्पति हैं ।।४३।। आप ही विष्णु के स्वरूप धारी हैं—आप ही धर्म हैं तथा आप ही पराजित्य जिष्णु हैं । अक्षरार्थ स्वरूप से आप परमेश्वर संज्ञा वाले हैं । हम सबके अपयात हो जाने पर यह जैसे होगा ।।४४।। इस प्रकार से हमने यहां पर शरीर का

Digitization by Arya Samaj Charitable Foundation, Chennai

त्यागकर दिया है। हे देव ! यहां पर आपसे पर कोई भी नहीं है सो यहां पर आप को ही पालन करना चाहिए।।४५।। हे प्रजापते ! स्वयं ही सृजन करके आपको स्थान को भ्रष्ट नहीं करना चाहिए। इस प्रकार से स्तवन किते हुए देव फिर परम तोष को प्राप्त हुए थे। ।।४६।। और उनको क्रीड़ा करने के लिये कहा था मैंने आप लोगों को समुत्पादित किया था। कृतकृत्य मुझे आप लोगों से एक प्रयोजन है ।।४७।। यदि उस प्रकार से आपको अप्रिय हो तो इस समय में प्रत्येक के दो-दो रूप भूत कार्यों में अमूर्त्त रूप के द्वारा ओर देव लोक में मूर्त्त रूप से शीघ्र ही लय में प्रविष्ट हो जाइये। फिर शरीरों को लय में प्रविष्ट करिए और पुनः अहम्—यह कहीं पर भी न करना चाहिए ।।४८।।

मूर्तिनां च तथा तुभ्यमग्निनामानि वोऽधुना।
अग्निर्वैश्वानरो नाम प्राणापानौं तथाश्विनौ ।।५०
भविष्यति तथा गौरी हिमशैलसुता तथा।
पृथव्यादिगुणस्त्वेष गजवक्त्रो भविष्यति ।।५१
शरीरधातवश्चेमे नानाभूतानि चैव तु।
अहंकारस्तथा स्कन्दः कार्तिकेयो भविष्यति ।।५२
शरीरमाया दुर्गैषा कारणात्ते भविष्यति।
दश कन्या भविष्यन्ति काष्ठासावृतास्तु वारुणाः ।।५३
अयं वायुर्द्धनेशस्तु कारणं ते भविष्यति।
अयं मनो विष्णुनामा भविष्यति न संशयः ।।५४
धर्मोऽपि यम नामा च भविष्यति न संशयः।
महत्तत्वं च भगवान् महादेवो भविष्यति ।।५५
इन्द्रियार्थाश्च पितरो भविष्यन्ति न संशयः।
अयं सोमः पुरा भूत्वा जामित्रं सर्वदामराः ।।५६
एवं वेदान्त पुरुषः प्रोक्तो नारायणात्मकः।
स्वस्थाने देवताः सर्वा देवस्तु विरराम ह ।।५७

Digitization by Arya Samaj Charitable Foundation, Chennai

एवं प्रभावो देवोऽसो वेदवेद्यो जनार्दनः ।
कथितो नृपते तुभ्यं किमन्यत् श्रोतुमिच्छसि ।।५८

अब आपके लिये मूर्तियों के अग्नि नाम हैं । अग्नि—वैश्वानर नाम हैं—प्राणापान तथा अश्विनी कुमार—यह होंगे । तथा गौरी और शैल सुता है—यह पृथिवी आदि का गुण है जो गज वक्त्र होंगे ।।५०।। ।।५१।। ये शरीर की धातुयें और नाना प्रकार के प्राणी हैं । तथा स्कंद कीर्त्ति के या अहंकार होंगे ।।५२।। यह शरीर माया दुर्गा कारण के अन्त में होगी । दश कन्यायें होंगी और ये वारुण काष्ठायें अर्थात् दिशायें हैं ।।५३।। यह वायु धनेश तुम्हारे कारण होंगे । यह मन विष्णु नाम वाला होगा—इसमें कुछ भी संशय नहीं हैं ।। ५४ ।। धर्म्म भी यम नाम वाला होगा—इसमें कुछ भी संशय नहीं है महत्तत्त्व भगवान् और महादेव स्वयं होंगे ।।५५।। इन्द्रियों के अर्थ अर्थात् विषय पितृगण होंगे-इसमें संशय नहीं है । हे अमरगणो ! यह सोम पहिले अमित्र होकर सर्वदा रहता है ।।५६।। इस प्रकार से वेदान्त पुरुष जो नारायण के स्वरूप वाले है कहे गये थे । देवता सब अपने स्थानों पर है और देवेश्वर ने विराम ग्रहण किया था ।।५७।। इस प्रकार के प्रभाव वाले यह देव हैं जो जनार्दन प्रभु वेदों के द्वारा जानने के योग्य होते हैं । हे नृपते ! यह सब कहकर सुना दिया है । अब आगे अन्य आप क्या श्रवण करना चाहते हैं ? ।।५८।।

१८—अग्नि उत्पत्ति वर्णन

कथमग्नेः समुत्पत्तिरश्विनोर्वा महामुनेः ।
गौर्यां गणपतेर्वापि नागानां वा गुहस्य च ।।१
आदित्य चन्द्र मातृणां दुर्गाया वा दिशां तथा ।
धनदस्य च विष्णोर्वा धर्मस्य परमेष्ठिनः ।।२
शम्भोर्वापि पितृणां च तथा चन्द्रमसो मुने ।

Digitization by Arya Samaj Charitable Foundation, Chennai

शरीर देवताः सर्वाः कथं मूर्तित्वमागताः ।।३
किं च तासां मुने भोज्यं का वा संज्ञा तिथिश्च का ।
यस्यां दृष्ट्वा त्वमी पुंसां फलं यच्छन्त्यनामयम् ।।४
एतन्मे सरहस्यं तु मुने त्वं वक्तुमर्हसि ।
योगसाध्यस्वरूपेण आत्मा नारायणात्मकः ।।५
सर्वज्ञः क्रीडतस्तस्य भोगेच्छा चात्मनात्मनि ।
क्षोभितेऽस्मिन्महाभूते एतत्सद्वै तदद्भुतम् ।।६
तमद्य प्रीतिमत्तोऽयं विकारं समरोचयत् ।
विकुर्वतस्तस्य तदा महानग्निः समुत्थितः ।।७

हे महामुने ! अग्नि की समुत्पत्ति कैसे हुई थी ? अथवा अश्विनियों का उद्भव किस तरह से हुआ था । गौरी का—गणपति का--नागों का और गुह का समुद्भव कैसे हुआ था ? ।।१।। आदित्य का—चन्द्रका—मातृगणों का—दुर्गा का तथा दिशाओं का धनद कुवेर का—भगवान् विष्णु का—धर्म का और परमेष्ठी का अथवा भगवान् शम्भु का तथा चन्द्रमा का हे मुने ! उद्भव कैसे हुआ था और ये सभी शरीर के देवता हैं फिर ये भूर्त्तित्व को कैसे प्राप्त हुए थे ।।२।।३।। हे मुनिवर ! उन देवताओं का भोज्य पदार्थ क्या है अथवा क्या संज्ञा है और कौन सी तिथि है ? जिसमें देखकर ये पुरुषों को अनामय फल प्रदान किया करते हैं ।।४।। हे मुनिवर ! यह सब रहस्य के ही साथ आप मुझे कहने के लिये समर्थ होते हैं । योग के द्वारा साध्य स्वरूप के द्वारा नारायण स्वरूप वाले आत्मा सर्वज्ञ हैं अर्थात् सब कुछ का ज्ञान रखने वाले हैं । क्रीड़ा करते हुए उनकी अपनी आत्मा ही के द्वारा आत्मा में भोग की इच्छा हुई थी । इस शोभित महा भूत में यह सत् है यह परम अद्भुत है ।।५।। ।। ६ ।। प्रीतिमान उनका यह आज विकार समरोचित हुआ था । उस समय में विकार युक्त होते हुए उनसे महान् अग्नि समुत्थित हुआ था ।। ७ ।।

Digitization by Arya Samaj Charitable Foundation, Chennai

कोटिज्वाला परीवारः शब्दवाम् दहनात्मकः ।
असावप्यति तेजस्वी विकारं समरोचयत् ।।८
विकुर्वतो बभौवह्नेर्वायुः परमदारुणः ।
तस्मादपि विकारस्थादाकाशं समपद्यत ।।६
तच्छब्दलक्षणं व्योम सच वायुः प्रतापवान् ।
तच्च तेजोऽम्भसायुक्तं श्लिष्टमन्योन्य तस्तथा ।।१०
तेजसा शोषितं तोयं वायुना उग्रगामिना ।
बोधितेन तथा व्योममार्गे दत्ते तुतत्क्षणात् ।।११
पिण्डीभूतं तथा सर्वं काठिन्यं समपद्यत ।
सेयं पृथ्वी महाभाग तेषां वृक्षेतराभवत ।।१२
चतुर्णां योग काठिन्यादेकैक गुण वृद्धितः ।
पृथ्वी पंचगुणा ज्ञेया तेऽप्येतस्यां व्यवस्थिताः ।।१३
सच काठिन्यकं कुर्वन् ब्रह्माण्डं समपद्यत ।
तस्मिन्नारायणो देवश्चतुर्मूर्तिः चतुर्भुजः ।।१४

करोड़ों ज्वालाऐं ही उसका परिवार है वह शब्द वाला तथा दहन करने के स्वरूप वाला है। यह भी अत्यधिक तेजस्वी था और उसने विकार को समरोचित किया था ।। ८ ।। विकार को प्राप्त हुए वह्नि से परम दारुण वायु सुशोभित हुआ था । वह भी जब विकार में स्थित हुआ था तो उससे आकाश समुत्पन्न हुआ ।।६।। वह व्योम शब्द के ही लक्षण वाला था अर्थात् आकाश में ही शब्द होता है और यही उसका लक्षण है और वह वायु प्रताप वाला था । वह तेज जल से युक्त और परस्पर में एक दूसरे से श्लिष्ठ थे ।। १० ।। तेज के द्वारा जल-शोषित किया गया था और वह तेज उग्रगामी वायु के द्वारा बोधित किया गया था । तथा उसी क्षण में व्योम के मार्ग में दिये जाने पर वह सब पिण्डीभूत होकर कठिनता को प्राप्त हो गया था । हे महाभाग ! वही यह पृथ्वी हुई थी जिसमें वृक्ष आदि इतर पदार्थ हुए थे ।। ११—१२ ।।

Digitization by Arya Samaj Charitable Foundation, Chennai

चारों के योग के काठिन्य से एक-एक में गुणों की वृद्धि हुई थी। यह पृथ्वी पाँच गुणों से समन्वित है—ऐसा नाम लेना चाहिए। ये पाँचों गुण इस पृथ्वी में व्यवस्थित रहा करते हैं ।। १३ ।। और वह कादित्य करता हुआ ब्रह्माण हुआ था। उन भगवान् नारायण देवेश्वर की चारों मूर्त्तियाँ हैं जो चार भुजाओं से युक्त हैं ।।१४।।

प्राजापत्येन रूपेण सिसृक्षुर्विविधा प्रजाः ।
चिन्तयन्नाधिगच्छेतु सृष्टि लोकपितामहः ।।१५
ततोऽस्य सुमहान् कोपो जज्ञे परमदारुणः ।
तस्मात्कोपात् सहस्रार्चिरुत्तस्थौ दहनात्मकः ।।१६
स तं दिधक्षुः ब्रह्माणं ब्रह्मणोक्तस्तद नृप ।
हव्यं कव्यं वहस्वेति ततोऽसौ हव्यवाहनः ।।१७
ब्रह्माणं क्षुधित प्रायात् किंकरोमि प्रशाधि माम् ।
स ब्रह्मा प्रत्युवाचैनं त्रिधा तृप्तिमवाप्स्यसि ।।१८
दत्तासु दक्षिणास्वादौ तृप्तिर्भूत्वा यतोऽमरान् ।
नयसे दक्षिणाभागं दक्षिणाग्निस्ततोऽभवत् ।।१६
आ समन्ताद् हुतं किंचिद्यत्त्रिलोके विभावसो ।
तद्वहस्व सुरार्थाय ततस्त्वं हव्यवाहनः ।।२०
गृहं शरीरमित्युक्तं तत्पतिस्त्वं यतोऽधुना ।
अतो वै गार्हपत्यस्त्वं भव सर्वगतो विभो ।।२१

प्रजापति के स्वरूप से अनेक प्रकार की प्रजाओं के सृजन करने की इच्छा वाले हुए थे। सृष्टि के सृजन करने के विषय में चिन्तन करते हुए भी उनको कुछ भी ज्ञान नहीं हुआ था कि मैं किस तरह से सृष्टि का सृजन करूँ। इसके अनन्तर उन प्रजापति ब्रह्माजी के हृदय में परम दारुण क्रोध उत्पन्न हो गया था। उसी क्रोध से सहस्रों अर्चियों वाला, दहन के स्वरूप वाला अग्नि समुत्थित हुआ था ।। १५—१६ ।। और वह ब्रह्मा को दग्ध करने की इच्छा वाला होकर समक्ष में आया था।

Digitization by Arya Samaj Charitable Foundation, Chennai

उस समय में ब्रह्माजी ने उससे कहा था—आप हव्य और कव्य का वहन कीजिए। तभी से यह हव्य वाहन नाम वाला हो गया था। अर्थात् उसी समय से अग्नि को हव्य वाहन—इस नाम से कहा जाने लगा था ॥१७॥ वह क्षुधित होकर ब्रह्माजी के समीप गया था। तब ब्रह्माजी ने इससे कहा था आप तीनों स्वरूपों वाला होकर ही तृप्ति को प्राप्त होओगे ॥ १८ ॥ आदि में सुदक्षिणाओं के देने पर आप सुतृप्त होकर क्योंकि दक्षिणा भाग को अमरों के लिये ले जाते हैं तभी से दक्षिणाग्नि हुए थे ॥ १६ ॥ हे विभावसो ! तीनों लोकों में जो कुछ भी हनन किया जावे उसी को आप सुरों के लिये वहन कीजिए। तभी से आप हव्य वाहन अर्थात् हव्य के वहन करने वाले हुए हैं ॥ २० ॥ आपका गृह शरीर ही है—ऐसा कहा गया है। आप उसके पति हैं। इसी कारण से इस समय में हे विभो ! आप गार्हपत्य हैं अतएव आप सर्वगत होइए ॥२१॥

विश्वान्नरान् हुतो येन नयसे सद्गति प्रभो।
अतो वैश्वानरो नाम तव सत्यं भविष्यति ॥२२
द्रविणं वलमित्युक्तं धनं द्रविणं ततः।
ददाति तद्भवानेव द्रविणोदास्ततोऽभवत् ॥२३
पापस्तिरोभवेन्नित्यं निःशब्दो निश्चयात्मकः।
अतस्त्वं सर्वगत्वाच्च तेजोऽग्निस्ते भविष्यति ॥२४
ध्माप्रपूरणं शब्दो य इध्मानामपि कीर्त्यते।
पूरितस्य गतिर्येन तेनेध्मस्त्वं भविष्यसि ॥२५
याज्यान्येतानि नामानि तव पुत्र महामखे।
यजन्तस्त्वां नराः कामैस्तर्पयिष्पन्त्यसंशयम् ॥२६

आप हुत होते हुए विश्व नरों को हे प्रभो ! सद्गति प्राप्त कराया करते हैं इसी कारण से आपका वैश्वानर—यह नाम अन्वर्थक और सत्य ही होगा ॥ २२ ॥ द्रविण वल है—ऐसा कहा गया है और

Digitization by Arya Samaj Charitable Foundation, Chennai

द्रविण धन होता है। इस द्रविण को आप ही दिया करते हैं अतएव तभी से आपका नाम द्रविणोदा यह हुआ था ॥ २३ ॥ पाप नित्य ही तिरोभूत होता है और वह निःशब्द एवं निश्चयात्मक है। अतएव सब में गत होने से ही आपका तेज अग्नि होगा ॥ २४ ॥ आपका शब्द धमा—इससे प्रपूरित होता है इसी कारण से आपका इध्मा—यह नाम भी कीर्त्तित किया जाया करता है। जिससे पूरित आप ही गति हैं इसीलिए आप इध्म होंगे ॥ २५ ॥ हे पुत्र ! महान् मख में ये नाम आपको याज्य होते हैं। मनुष्य आपका यजन करते हुए मनोरथों से आपको तृप्त करेंगे—इसमें संशय नहीं है ॥२६॥

१६–अग्नि की श्रेष्ठता और प्रशंसा

विष्णोर्विभूतिमाहात्म्यं कथितं ते प्रसङ्गतः ।
तिथीनां शृणु माहात्म्यं कथ्यमानं मया नृप ॥१
इत्यम्भूतोमहानग्निः ब्रह्मक्रोध समुद्भवः ।
उवाच देवं ब्रह्माणं तिथिर्मे दीयतां विभो ।
यस्यामहं समस्तस्य जगतः ख्यतिमाप्नुयाम् ॥२
देवानामथ यक्षाणां गंधर्वाणां च सत्तम ।
आदौ प्रतिपदा येन त्वमुत्पन्नोऽसि पावक ॥३
त्वत्पदात् प्रातिपादकं सम्भविष्यन्ति देवताः ।
अतस्ते प्रतिपन्नाम तिथिरेषा भविष्यति ॥४
तस्यां तिथौ हविष्येण प्राजापत्येन मूर्तिना ।
होष्यन्ति तेषां प्रीताः स्युः पितरः सर्व देवताः ॥५

भगवान् विष्णु की विभूतियों का माहात्म्य मैंने प्रसङ्ग वश आपको कह दिया है। हे नृप ! अब मेरे द्वारा कहे जाने वाले तिथियों

Digitization by Arya Samaj Charitable Foundation, Chennai

का माहात्म्य सुनिये ।। १ ।। महान् अग्नि इसी प्रकार का है जो ब्रह्मा जी के क्रोध से समुद्भूत हुआ है। उसने ब्रह्माजी से कहा था—हे विभो ! मुझे तिथियाँ भी प्रदान कीजिये जिससे मैं इस सम्पूर्ण जगत् की ख्याति अर्थात् प्रसिद्धि को प्राप्त करलूँ ।। २ ।। देवो की—यक्षों की और गन्धर्वों की हे श्रेष्ठतम ! ब्रह्माजी ने कहा था आदि में प्रतिपदा तिथि है जिसमें हे पावक ! आप समुत्पन्न हुए हैं ।। ३ ।। देवता लोग आपके पद से प्रतिपादक की ही सम्भावना करेंगे। इसीलिये आपका नाम प्रतिपद है और यही प्रतिपदा आपकी तिथि भी होगी ।। ४ ।। उस तिथि में हविष्य के द्वारा प्रजापत्य मूर्ति से लोग हवन करेंगे उन परं हवन करने वाले मानवों पर सत्र पितृगण और देवगण परम प्रसन्न होंगे ।। ५ ।।

चतुर्विधानि भूतानि मनुष्याः पशवोऽसुराः ।
देवाः सर्वे सगन्धर्वाः प्रीताः स्युस्तर्पितास्त्वयि ।।६
यश्चोपवासं कुर्वीत त्वद्भक्तः प्रतिपद्दिने ।
क्षीराशनो वा वर्त्तेत श्रृणु तस्य फलं महत् ।
चतुर्युगानि षडविंशं स्वर्गलोके महीयते ।।७
तूष्णीम्बभूव सोऽप्यग्निः ब्रह्मदत्ताश्रम ययौ ।।९
य इदं श्रृणुयान्नित्यं प्रातरुत्थाय मानवः ।
अग्नेर्जन्मन्यसौ पापेभ्यो मुच्यते नात्र संशयः ।।१०

चार प्रकार के प्राणी हैं। मनुष्य—पशु और असुर—सब देवता और गन्धर्व गण आप में हीं तर्पित होकर प्रसन्न हुआ करते हैं ।। ६ ।। जो मनुष्य आपका भक्त होकर प्रतिपदा के दिन में उपवास किया करता है अथवा केवल खीर का अशन करने वाला रहता है उसको जो महान् फल होता है उसका श्रवण करिए। चार युगों के छब्बीस संख्या तक वह स्वर्गलोक में प्रतिष्ठित हुआ करता है ।। ७ ।। इसके अनन्तर वह अग्नि चुप हो गया था और ब्रह्माजी के दिये हुए आश्रम में चला गया

Digitization by Arya Samaj Charitable Foundation, Chennai

था। जो कोई मानव नित्य ही प्रात.काल में उठकर इसका श्रवण किया करता है वह अग्नि की कृपा से इस जन्म में निश्चय ही पापों से मुक्त हो जाया करता है—इसमें कुछ भी संशय नहीं है ॥ ९—१० ॥

२०—अश्विनीकुमारों की उत्पत्ति

एवमग्नेः समुत्पत्तिर्जाता ब्रह्मन्महात्मनः ।
प्राणापानौ कथं देवाश्विनौ सम्बभूवतुः ॥१
मरीचिर्ब्रह्मणः पुत्रः स्वयं ब्रह्मा द्विसप्तिभिः ।
रूपैः व्यवस्थितस्तेषां मरीचिः श्रेष्ठतामगात् ॥२
तस्यपुत्रो महातेजाः कश्यपो नाम वै मुनिः ।
स्वयं प्रजापति श्रीमान्देवतानां पिताभवत् ॥३
तस्य पुत्र बभूर्वुहि आदित्या द्वादश प्रभो ।
नारायणात्मकं तेजो द्वादशेति प्रकीर्तितम् ॥४
ते च मासास्त आदित्याः स्वयं संवत्सरो हरिः ।
एवं ते द्वादशादित्य मार्तण्डश्च प्रतापवान् ॥५
तस्य त्वष्टा ददौ कन्यां संज्ञां नाम महाप्रभाम् ।
तस्यापत्यद्वयं जज्ञे यमश्च यमुना तथा ॥६
तस्य तेजोऽप्यसहती बभूवाश्चा मनोजवा ।
स्वां छायां तत्र संस्थाप्य सा जगामोत्तरान् कुरून् ॥७

हे ब्रह्मन् ! इस प्रकार से महात्मा अग्नि देव की उत्पत्ति हुई थी। हे देव प्राण और अपान ये दोनों अश्विनी कुमार कैसे हुए थे ? ॥ १ ॥ मरीचि ऋषि ब्रह्माजी के पुत्र थे और स्वयं ब्रह्मा जी बहत्तर रूपों से व्यवस्थित थे। उनमें मरीचि ऋषि ही परम श्रेष्ठता को प्राप्त हुए ॥ २ ॥ उस मरीचि का पुत्र महान् तेजस्वी कश्यप नाम

Digitization by Arya Samaj Charitable Foundation, Chennai

वाले मुनि हुए थे। यह श्रीमान् स्वयं ही प्रजापति हुए थे और देवताओं के पिता थे ।। ३ ।। हे प्रभो ! उसके पुत्र द्वादश आदित्य हुए थे। वह नारायण के स्वरूप वाला तेज था जो द्वादश—इस नाम से प्रकीत्तित हुए थे ।। ४ ।। उसमें मास थे वे ही आदित्य थे और हरि स्वयं सम्वत्सर हुए थे। इस रीति से वे द्वादत आदित्य है और प्रतापवान् मार्त्तण्ड है ।। ४ ।। ५ ।। उसको त्वष्टा ने अपनी कन्या दी थी जिसका नाम महा प्रभा था उसके दो सन्तान हुई थीं। एक यम और दूसरी कन्या यमुना ने जन्म ग्रहण किया था ।। ६ ।। उसके तेज को उसने सहन नहीं किया और अमनोजवा हो गई थी उसने अपनी छाया को वहाँ पर स्थापित कर दिया था और वह उजर कुरु देशों को चली थी ।। ७ ।।

तद्रूपां तां सवर्णां तु भेजे मार्तण्डभास्करः ।
तस्मादपि द्वयं जज्ञे शनिं तपती मेव च ।।८
यदा त्वसदृशं भेजे पुत्रान् प्रति नरोत्तमः ।
छायां प्रोवाच भगवान् क्रोधसंरक्त लोचनः ।
असमत्वं न कर्तव्यं स्वेष्वपत्येषु भामिनि ।।९
एवमुक्ता यदा सा तु ह्यसम त्वं व्यरोचत ।
ततः यमः स्वपितरं प्रोवाच भृशदुःखितः ।।१०
नेयं माता भवेत्तात त्वस्माकं शत्रुवत्सदा ।
सपत्नीव वृथाचारा स्वेष्व पत्येषु वत्सला ।।११
एवं यमवचः श्रुत्वा साच्छाया क्रोधमूर्च्छिता ।
शशाय प्रेतराजस्त्वं भविष्यस्यचिरादिव ।।१२
एवं श्रुत्वाथ मार्तण्डस्तदा पुत्रहितेच्छया ।
उवाच मध्यवर्ती त्वं भविता धर्मपापयो ।
लोकपालश्च भविता त्वं पुत्र दिवि शोभसे ।।१३
शनिं शशाय मार्तण्डः छायाकोपप्रधर्षितः ।
त्वं क्रूरदृष्टिर्भविता मातृदोषेण पुत्रक ।।१४

Digitization by Arya Samaj Charitable Foundation, Chennai

उसी के रूप वाली सवर्णा उसका मार्त्तण्ड भास्कर ने सेवन किया था। उससे भी दोनों ने जन्म ग्रहण किया था। एक तो शनि थे और दूसरी सन्तति तपती थी ॥ ८ ॥ जिस समय में असदृश का सेवन किया था तो नरोत्तम भगवान् ने छाया से कहा था और क्रोध से रक्त लोचन वाले ने पुत्रों के प्रति कहा था। हे भामिनि अपनी सन्ततियों में असमता कभी भी नहीं करनी चाहिए ॥ ९ ॥ जब उससे ऐसा कहा गया तो भी उसने असमता ही को ठीक समझा इसके अनन्तर यम ने अत्यन्त दुःखित होकर अपने पिता से कहा था ॥१०॥ हे तात ! यह माता नहीं है। यह तो हमको सदा शत्रु की ही भाँति देखा करती है। यह कैसी वत्सला है कि सदा अपनी ही सन्ततियों में सपत्नी की ही भाँति वृथा आचार किया करती है ॥ ११ ॥ इस प्रकार यम के वचन को सुन करके यह छाया क्रोध से मूच्छित हो गई थी। और उसने शाप दे दिया था कि तू शीघ्र ही प्रेतराज हो जायगा ।१२। इस तरह से श्रवण करके मार्त्तण्ड ने स्वयं पुत्र के हित की इच्छा से कहा था कि तुम धर्म और पाप के मध्यवर्त्ती हो जाओगे। हे पुत्र ! तुम लोक पाल होओगे और दिवलोक में—शोभित होओगे ॥ १३ ॥ छाया के कोप से प्रधर्षित होकर मार्त्तण्ड शनि का शाप दे दिया था कि हे पुत्र ! तू क्रूर दृष्टि वाला माता के ही दोष से हो जायगा ॥१४॥

एवमुक्त्वा समुत्थाय ययौ भानुः दिदृक्षया।
तामपश्यत्त्वसावश्वामुत्तरेषु करुष्वथ ॥१५
ततोऽश्वरूपं कृत्वा स गत्वा तत्रोत्तरान् कुरून्।
प्राजापत्येन मार्गेण युयोजात्मानमात्मना ॥१६
तस्यां त्वष्ट्र्यामश्वरुप्यां मार्तण्डस्तीव्रतेजसा।
बीजं निर्वापयामास तज्ज्वलत्तु द्विधापतत् ॥१७
तत्र प्राणस्त्वपानश्च योनौ चात्मजितौ पुरा।
वरदानेन च पुनर्मूर्तिमन्तौ बभूवतुः ॥१८

Digitization by Arya Samaj Charitable Foundation, Chennai

तौ त्वाष्ट्र्यामश्वरुपायां जातौ येन नरोत्तमौ ।
ततस्तावश्विनो देवौ कीर्त्येते रवि नन्दनौ ॥१६
प्राजापत्यं स्वयं भानुः त्वाष्ट्री शक्ति परापरा ।
तस्याः प्रागवच्छरीरस्थावमूर्तो मूर्तिमाश्रितौ । २०
ततस्तावश्विनौ देवौ मार्तण्ड मुपतस्थतुः ।
ऊचतुः स्वर्रुचि तावत् किं कर्तव्यमथावयोः ॥२१

इस प्रकार से कहकर स्वयं उठकर भानुदेव देखने की इच्छा से गये थे। उसने उसको उत्तर कुरुओं में जाकर अश्व के रूप में देखा था ॥ १५ ॥ फिर इसके अनन्तर वह अश्व का रूप धारण करके उत्तर कुरुओं में गया था और प्राजापत्य मार्ग के द्वारा आत्मा के द्वारा आत्मा को योजित किया था ॥ १६ ॥ उस अश्व रूप वाली त्वष्ट्री मे मार्त्तण्ड ने अपने तीव्र तेज से अपने बीज का निर्वपन किया था और वह जलता हुआ दो भागों में गिरा था ॥ १७ ॥ वहाँ पर प्राण और अपान जो पहिले आत्मजित थे और इसी योनि में उत्पन्न हुए थे और फिर वरदान से वे दोनों मूर्त्तिमान् हो गये थे ॥ १८ ॥ वे दोनों अश्व रूप वाली त्वाष्ट्री गर्भ से समुत्पन्न हुए थे और ये नरों में उत्तम थे। इसी से फिर वे दोनों अश्विनी देव रवि के पुत्र कहे जाया करते हैं ॥ १६ ॥ भानुदेव स्वयं प्राजापत्य के रूप में थे और त्वाष्ट्री परुणा शक्ति थी। उसके प्रागवत् शरीर में स्थित अमूर्त्त मूर्त्ति में समाश्रित हुए थे ॥ २० ॥ इसके अनन्तर वे दोनों अश्विनी कुमार देव अपने पिता श्रीमार्त्तण्ड देव के समीप में उपस्थित हुए थे। और उन दोनों ने कहा था कि हम दोनों का क्या कर्त्तव्य है ॥ २१ ॥

पुत्रौ प्रजापतिं देवं भक्त्याराधयतां वरम् ।
नारायणं सवो दवि वरं नूनभवाप्स्यथः ॥२२
एवं तावश्विनौ प्रोक्तौ मार्त्तण्डेन महात्मना ।
तेपतुस्तीव्र तरसौ तपः परमदुश्चरम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

ब्रह्मपारमयं स्तोत्रं जपन्तौ तु समाहितौ ।।२३
तयो कालेन महता ब्रह्मा नारायणात्मकः ।
तुतोष परमप्रीत्या वरं चैवं ददौतयोः ।।२४
वरं वरयतां शीघ्रं देवैः परमदुर्लभम् ।
येन वो वरदानेन चरतस्त्रिदिवे सुखम् ।२५
आवयोर्देवभागं तु देहि देव प्रजापते ।
सोमपत्वं च देवानां सामान्यत्वं च शाश्वतम ।।२६

मार्त्तण्ड देव ने उनसे कहा था—हे पुत्रा ! भक्ति की समुत्कट भावना से प्रजापति देव की समाराधना करो। और वर प्राप्त करो। भगवान् नारायण सभी कुछ के प्रदान करने वाले हैं। आप दोनों निश्चित रूप से वर प्राप्त कर लेंगे ।। २२ ।। इस रीति से उन दोनों अश्विन कुमारों से महात्मा मार्त्तण्ड देव ने कहा था। उन दोनों ने तीव्र तपस्वी होकर परम दुश्चय तपश्चर्या का तप न किया था। उन्होंने परम समाहित होकर ब्रह्म पार मय स्तोत्र का जप किया था ।। २३ ।। इसके उपरान्त वहुत अधिक काल में नारायण के स्वरूप वाले ब्रह्मा जी परम प्रसन्न हुए थे और उन दोनों को वरदान भी दे दिया था ।।२४।। आप दोनों ही वर का वरण करो जो देवों के द्वारा भी परम दुलंभ होवे। जिस वरदान के द्वारा आप लोग त्रिदिय में सुख पूर्वक चरण करें ।।२५।। उन्होंने कहा--हे प्रजापते ! हे देव ! इन दोनों को देवों का भाग दीजिए। देवों का जो सोम यत्व है और सामान्यत्व है जो शाश्वत होवे वही देंने की कृपा कीजिए ।। २६ ।।

रूपं कान्तिर नौपम्यं भिषक्त्वं सर्ववस्तुषु ।
सोमपत्वं च लोकेषु सर्वमेतद्भविष्यति ।।२७
एतत्सर्वं द्वितीयायामश्विभ्यां ब्रह्मणा पुरा ।
दत्तं यस्मादतस्तेषां तिथीनामुत्तमा तिथिः ।।२८
एतस्यां रूपकामस्तु पुष्पाहारो भवेन्नरः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

संवत्सरं शुचिर्नित्यं मुस्वरुपो भवेन्नरः ।।२६
अश्विनोर्ये गुणाः प्रोक्तास्ते तस्यापि भवन्ति च ।
य इदं श्रणुयान्नित्यमश्विनोः जन्म चोत्तमम् ।
सर्वपाप विनिर्मुक्तः पुत्रवान् जायते नरः ।।३०

अनुपम रूप—कान्ति—सब वस्तुओं में भिषक्त्व और लोकों में सोमपत्व अर्थात् सोम रस का पान यह सभी आप दोनों का हो जायगा ।। २७ ।। यह सभी कुछ ब्रह्मा जी ने पहिले द्वितीया तिथि में अश्विनी कुमारों को दिया था । इसीलिये उनकी तिथियों में द्वितीया उत्तम तिथि होती ।। २८ ।। इस तिथि में रूप की कामना रखने वाला पुरुष पुष्पों के हार वाला होना चाहिए । एक वर्ष तक नित्य ही शुचि रहे तो मनुष्य सुन्दर स्वरूप वाला हुआ करता है।२६। अश्विनी कुमारों के जो गुण कहे गये हैं वे उस मनुष्यों के भी हो जाया करते हैं । जो पुरुष नित्य ही इस अश्विनीकुमारों के अत्युत्तम जन्म का श्रवण किया करता है वह सभी प्रकार के पापों से छुटकारा पा जाता है और नर पुत्रवान् हो जाता है ।। ३० ।।

२१--गौरी की उत्पत्तिः

कथं गौरी महाप्राज्ञ संस्तुता वरदानतः ।
मूर्तिं लब्धवती पुंसः परस्य परमात्मनः ।।१
पूर्वं प्रजापतिर्देवः सिसृक्षुः विविधाः प्रजाः ।
चिन्तयामास धर्मात्मा यदा तानाध्यगच्छत ।।२
तदास्य कोपात्संजज्ञे स च रुद्रः प्रतापवात् ।
रोदनात्तस्य रुद्रत्वं संजातं परमेष्ठिनः ।।३

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्य ब्रह्मा शुभः कन्यां भार्यार्थं मूर्तिसम्भवाम् ।
गौरी नाम्नीं स्वयं देवीं भारतीं तां ददौ पिता ।
रुद्रायामितदेहाय स्वयं ब्रह्मा प्रजापतिः ।।४
स तां लब्ध्वा वरारोहां मुदा परमया युतः ।
सर्गकालेषु तं ब्रह्म तपसा प्रत्युवाच ह ।।५
रुद्र प्रजाः सृजस्वेति पौनः पुन्येन चोदितः ।
असमर्थोऽस्मीति जलेन्यमज्जत महाबलः ।।६
तपोऽर्थी त्वं तपोहीनः स्रष्टुं शक्नोति न प्रजाः ।
एवं चिन्त्य जले मग्नस्ततो रुद्रः प्रतापवान् ।।७

हे महा प्राज्ञ ! गौरी किस तरह से वरदान से संस्तुत हुई थी और उसने कैसे परात्पर परमात्मा पुरुष की मूर्त्ति का लाभ प्राप्त किया था ।। १ ।। सबसे पूर्व में देव प्रजापति ने सृजन की इच्छा वाले होकर अर्थात् अनेक प्रकार की प्रजाओं की सृष्टि का सृजन की अभिलाषा वाले ने जिस समय में धर्मात्मा ने चिन्तन किया था तो उनका ज्ञान प्राप्त नहीं किया था । उस समय में उनको बड़ा भारी क्रोध हुआ था । और उसी कोध से प्रतापवान् रुद्र देव ने जन्म ग्रहण किया था । रुदन करने ही से परमेष्ठी उनको रुद्रत्व हो गया था ।। २ ।। ३ ।। उनको ब्रह्मा जी ने शुभ कन्या जो मूर्त्ति से समुत्पन्न की भार्या के लिये गौरी नाम वाली स्वयं देवी भारती उसके पिताजी ने दी थी । प्रजापति ब्रह्मा जी ने स्वयं ही अमिन देह वाले रुद्र देव को दी थी ।। ४ ।। वह उस वरा सेहा को प्राप्त करके परम हर्ष से समन्वित हो गये थे और सभी कालों में उन्होंने ब्रह्मा जी ने तपस्या से युक्त उनसे कहा था कि हे रुद्र ! प्रजा की सृष्टि का सृजन करो और इसी बाल को बारम्वार उनसे कहकर उनको प्रेरित किया था । इस पर रुद्र देव ने कह दिया था कि मैं सृजन का कार्य सम्पादन करने में असमर्थ हूँ । और यह कहकर वह महा बलवान् जल में निमग्न हो गये थे ।।५।।६।। तुम तप करने के

Digitization by Arya Samaj Charitable Foundation, Chennai

अर्थी है। तुम से हीन हो जो कि प्रजा का सृजन नहीं कर सकते है। ऐसा ही चिन्तन करके फिर वह रुद्र देव जो प्रतापवान् थे जल में मग्न हो गये थे ॥ ७ ॥

तस्मिन्निमग्ने देवेशे तां ब्रह्मा कन्यकां पुनः ।
अन्तः शरीरगां कृत्वा गौरीं परम शोभनाम् ॥८
पुनः सिसृक्षुः भगवान सृजत सप्त मानसान् ।
दक्षं च तत आरभ्य प्रजाः सम्यग्विवर्धिताः ॥९
तत्र दाक्षायणी पुत्राः सर्वे देवाः सवासवाः ।
वसवोऽष्टौ च रुद्राश्च आदित्या मरुतस्तथा ॥१०
सापि दक्षाय सुश्रोणी गौरी दत्ताथ ब्रह्मणा ।
दुहितृत्वे पुरा या हि रुद्रेणोढा महात्मना ॥११
सा च दाक्षायणो देवी पुनर्भूत्वा नृपोत्तम ॥१२
ततोदक्षः प्रहृष्टात्मा दौहित्रांस्तान् समृद्धिकृतः ।
दृष्ट्वा यज्ञमथारेभं प्रीणनाय प्रजापतेः ॥१३
तत्र ब्रह्मसुताः सर्वे मरीच्यादय एव च ।
चक्रुरार्त्विज्यकं कर्म स्वे स्वे मार्गे व्यवस्थिताः ॥१४

उस देवेश्वर के जल में निमग्न हो जाने पर ब्रह्माजी ने उस कन्या को पुनः अपने अन्दर शरीर में रहने के लिए कर लिया था जो कि परम शोभना गौरी थी ॥८॥ भगवान् ब्रह्माजी फिर सृजन की इच्छा वाले होकर उन्होंने सात मानस पुत्रों को समुत्पन्न किया था और दक्ष को उत्पन्न किया था जहाँ से आरंभ करके प्रजा भली भाँति बिवर्धित हुई थी ।९। वहाँ पर सब प्रजा दाक्षायणी हुई थी उसमें सब देवगण-इन्द्र-वसुगण-मरुद्गण-आदित्य हुए थे । ब्रह्माजी ने कुससुश्रोण गौरी को दक्ष के लिये दे दी थी। और यह कहा था कि पहिले दक्ष की दुहिता बनो फिर महात्मा रुद्र के द्वारा व्याही जाने वाली होओगी ।। १० ॥ ११ ॥ हे नृपोत्तम ! और वह दाक्षायणी देवी ने पुनः जन्म ग्रहण किया था ॥ १२ ॥ इसके अनन्तर

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रजापति दक्ष ने समृद्धि करने वाले दौहित्रों के देखकर बहुत प्रसन्न हुए थे और प्रजापति को प्रीणित करने के लिये उन्होंने यज्ञ करना आरम्भ कर दिया था ।। १३ ।। इसके अनन्तर ब्रह्माजी के पुत्र मरीचि आदि सबने ऋत्त्विजों का कर्म अपने—अपने मार्ग में व्यवस्थित होकर किया था ।। १४ ।।

तत्र याज्यः स्वयं ब्रह्मा स च इज्यस्तु विश्वकृत ।
पूज्यं दक्षस्य दौहित्रा रुद्रादित्योऽङ्गिरादयः ।।१५
प्रत्यक्षं पितरस्ते हि तैः प्रीतैः प्रीयते जगत् ।
तत्र भागार्थिनौ देवा आदित्या वसवस्तथा ।।१६
विश्वेदेवाः सपितरो गन्धर्वाद्या मरुद्गणाः ।
जगृहुः यज्ञभागांस्तान्यावन्तो हविषार्पिताः ।।१७
तावत्कालं जलात् सद्य उत्तस्थौ ब्रह्मणः पुनः ।
रुद्रः कोपोद्भवो यस्तु पूर्वं मग्नो महाजले ।।१८
स सहस्रार्कसंकाशो निश्चक्राम जलात्ततः ।
सर्वज्ञानमयो देवः सर्वदेवमयोऽमलः ।।१९
अधिरुद्रो यदा रुद्रस्तथा चोर्वी सकाननाम् ।
दृष्ट्वा सस्यवतीं रम्यां मनुष्य पशु संकुलाम् ।।२०
शुश्राव च तदा शब्दानृत्विजां दक्षसद्मनि ।
आश्रमे यज्ञियानोच्चैः योगस्थैरिति कीर्तितान् ।।२१

उसमें ब्रह्मा स्वयं राज्य थे और वह विश्व के करने वाले याज्य थे दौहित्र रुद्र आदित्य और आङ्गिरादिक पूज्य थे । वे सब प्रत्यक्ष में पितर थे जिनके प्रीत होने पर सभी जगत् प्रीणित है । उसमें भागों के आदित्य वसुगण देव थे ।। १५ ।। १६ ।। विश्वे देवा—पितर—गन्धर्व आदि—मरुद्गण—इन सब ने हवि के द्वारा अर्पित जितने भी यज्ञ भाग थे उनको ग्रहण किया था ।। १७ ।। उतने काल में जल से ब्रह्माजी के सामने तुरन्त ही पुनः उत्थित हुए थे जो रुद्र कोप से अद्भूत थे और

Digitization by Arya Samaj Charitable Foundation, Chennai

पहिले जल में मग्न गये थे ।। १८ ।। उस समय म वह सहस्रों के सदृश थे और उस जल से निकल कर बाहिर आये थे । वे देव सम्पूर्ण थे तथा वे सब देवों से सम्पन्न थे तथा अमल थे ।। १९ ।। जिस समय में रुद्र से युक्त पृथ्वी थी तो उन रुद्र देव ने वनों के सहित पृथ्वी को देखा था ओर उसको सस्य वाली—रम्य तथा मनुष्यों और पशुओं से संकुल देखा था ।। २० ।। और इसके अनन्तर उन्होंने दक्ष के भवन में ऋत्विजों के शब्दों का भी श्रवण किया था । आश्रम में योग में स्थित यज्ञियों को कीर्त्तित थे श्रवण किया था ।। २१ ।।

तत श्रुत्वा महातेजाः सर्वज्ञः परमेश्वरः ।
चुकोय सुभृशं देवो वाक्यं चेदमुवाच ह ।।२२
अहं पूर्वं तु कविना सृष्टः सर्वात्मना विभुः ।
प्रजाः सृजस्वेति तदा वाक्यमेतत्तथोक्तवान् ।।२३
इदानीं केन तत्कर्म कृतं सृष्ट्यादि वर्णनम् ।
एवमुक्तो भृशं कोपन्ननाद परमेश्वरः ।।२४
तस्मैव नदतो ज्वालाः श्रोत्रेभ्यो निर्ययुस्तदा ।
तत्र भूतानिबेताला उच्छुष्माः प्रेतपूतनाः ।।२५
उत्तस्थुः कोटिशस्तत्र नाना प्रहरणावृताः ।
तं दृष्ट्वा भूतसंघाता विविधायुधपाणयः ।।२६
ससर्ज वेदविद्याङ्गरथं परम शोभनम् ।
तस्मिन्मृगद्वयं स्वश्वो त्रितत्त्वं च त्रिवेणुकम् ।।२७
त्रिपूजकं त्रिषवणं धर्माक्षं मारुतध्वनिम् ।
अहो रात्रे पताके द्वे धर्माधर्मे तु दण्डकम ।।२८

इसके अनन्तर महातेजस्वी परमेश्वर ने श्रवण करके देवेश्वर बहुत ही अधिक कुपित हुए थे और उन्होंने यह वाक्य कहा था ।।२२।। सर्वात्मा कवि ने पूर्व में विभु मेरा सृजन सर्वात्मा ने किया था और मुझसे प्रजा का सृजन करने के लिये कहा था । उन्होंने प्रजा का सृजन

Digitization by Arya Samaj Charitable Foundation, Chennai

करो'— यह वाक्य मुझसे कहा था ॥२३॥ इस समय में यह सृष्टि आदि का वर्णन का कर्म किसने किया है। इस प्रकार से कहकर परमेश्वर बहुत अधिक कोप से नाद करने वाले हुए थे ॥२४॥ उनके नाद से उस समय में श्रोत्रों से ज्वालाऐं निकली थीं उन ज्वालाओं में भूत वेताल— अच्छुष्म— प्रेत— पूतना आदि करोड़ों की संख्या में प्रहरणों से समन्वित उठकर खड़े हो गये थे। अनेक आयुधों को हाथों में ग्रहण किये हुए उन भूत संघातों को देखकर एक परम शोभय वेद विद्याङ्ग रथ का सृजन किया था। उस रथ में दो भृग अश्व थे—तीन तत्त्वों वाला और वह तीन गुणों वाला था ॥ २६—२७॥ वह त्रिपूजक— त्रिषवण—धर्म के अक्षों वाला और मारुत ध्वनि से युक्त था। उसके दिन और रात दो पताकाऐं थीं और धर्माधर्म दण्ड थे ॥२८॥

शकटं सर्वंविद्याश्च स्वयं ब्रह्मा हि सारथिः ।
गायत्री च धनुस्तस्य ओङ्कारो गुण एव च ॥२६
स्वराः सप्त शरास्तस्य देव देवस्य सुव्रत ।
एवं कृत्वा स सामग्रीः देवदेवः प्रतापवान् ॥३०
जगाम दक्षयज्ञाय कोपाद्रुद्रः प्रतापवान् ।
गच्छतस्तस्य देवस्य अम्बराङ्गिरसन्नयत ॥३१
ऋत्विजां मन्त्रनिचयो नष्टो रुद्रागमे तदा ।
विपरीतमिदं दृष्ट्वा तदा सर्वेऽत्र ऋत्विजः ॥३२
उचु, सन्नह्यतां देवा महद्वो भयमागतम् ।
कश्चिदायाति बलवानसुरो ब्रह्मनिर्मितः ॥३३
यज्ञभागार्थ मेतस्मिन् क्रतौ परमदुर्लभे ।
एवमुक्तास्ततो देवा ऊचुमीतामहं तदा ॥३४
दक्ष तात किमत्रास्मत् कार्यं ब्रूहि विवक्षितम् ।
ऊह्यन्तां द्रुतमस्त्राणि संग्रामोऽत्र विधीयताम् ॥३५

यह शंकर था जिसमें सभी विद्याऐं थी और ब्रह्माजी स्वयं

Digitization by Arya Samaj Charitable Foundation, Chennai

ही उसके सारथि थे। गायत्री ही उसका धनुष था तथा ओङ्कार उस धनुष की डोरी थी ॥ २९ ॥ सात षड्ज आदि स्वर ही उसके शर थे। हे सुव्रत ! उन देव का ऐसा ही रथ था। वह प्रतापवान् देवों के भी देव ने इस प्रकार की सामग्री की रचना करके ये रुद्रदेव दक्ष के यज्ञ में कोप समन्वित होकर प्रतापी वहाँ पर गये थे। गमन करते हुए उन देव के अम्वरणङ्गिरस्तें को ले जाओ। जो शक्ति से समुत्पन्न हैं। उन रुद्र देव के आगमन होने पर उस समय में मन्त्रों का समूह नष्ट हो गया था। इस परम विपरीत कार्य को देखकर उस समय में सब ऋत्विज कहने लगे थे कि सब देव सम्भहत्वभान हो गये हैं अथवा कोई महान् भय आने वाला है। अथवा कोई ब्रह्म निर्मित बलवान् असुर आ रहा है ॥ ३० ॥—॥ ३३ ॥ इस परम दुर्लभ ऋतु में यज्ञ के भाग के लिये ही कोई आ रहा है। यह कहकर उस समय में देवों ने मातामह से कहा था—हे तात ! हे दक्ष ! अब यहाँ पर हमारा क्या कार्य है ? जो भी कुछ आपका विवक्षित हो उसे ही बतलाइए। देवों ने कहा था—बहुत शीघ्र ही अस्त्रों को उठाइए। यहाँ पर अब संग्राम करिए ॥ ३४ ॥ ३५ ॥

एवमुक्ते तदा देवैर्विविधायुध धारिभिः।
रुद्रस्यानुचरैः सार्धं महद्युद्धं प्रवर्तितम् ॥३६
तत्र वेतालभूतानि कूष्माण्डा ग्रहपूतनाः।
युयुधुर्लोकपालेश्च नानायुध धराणि च ॥३७
ततस्तस्मिन् महारौद्रे संग्रामे भीमरूपिणि
रुद्रो भगस्य नेत्रे तु विभेदंकेषुणामृधे ॥३८
रुद्रस्यशरपातेन नष्टनेत्रं भगं तदा।
दृष्ट्वास्य क्रोधत्तेजस्वी पूषा रुद्रमयोधयत् ॥३९
तस्य दन्तांस्तदा दृष्ट्वा पूष्णो रूपेण पातितान्।
दुद्रुवुः सर्वतो दिक्षु रुद्रास्त्वेकादश द्रुतम् ॥४०

Digitization by Arya Samaj Charitable Foundation, Chennai

तां भग्नां सहसा दिक्षु दृष्ट्वा विष्णुः प्रतापवान् ।
आदित्यावरजो वाक्यमुवाच स्वबलं तदा ।।४१
परमेष्ठिगुणैर्युक्ता लब्धमायुर्यतः पुरा ।
तं नमस्कुरुतामोघं पृथिव्यां पद्मजं स्वयम् ।।४२

देवों के द्वारा इस प्रकार से दक्ष से कहा था और अनेक प्रकार के अस्त्रों के धारण करने वाले रुद्र के अनुचरों के साथ यहाँ पर युद्ध प्रवृत्त हो गया था ।।३६।। उस युद्ध में वेताल-भूत-कूष्माण्ड-ग्रहण पूतना ये सब अनेक आयुधों के धारण करने वाले लोक वालों के साथ युद्ध करने लगे थे ।।३७।। इसके अनन्तर उस युद्ध में जो महान् रौद्र था और जिसका महान् भयानक रूप वाला था रुद्रदेव ने उस युद्ध में एक ही वाण के द्वारा भग के नेत्र में भेदन कर दिया था ।।३८।। रुद्रदेव के शर के गिरने से उस समय में अपने नेत्र से हीन मन को देखकर क्रोध से पूषा ने रुद्रदेव से युद्ध किया था ।।३९।। उस अवसर में रुद्रदेव के द्वारा पूषा के गिराये हुए दाँतों को देखकर सभी दिशाओं में एकादश रुद्रों ने शीघ्र ही आक्रमण किया था ।।४०।। प्रतापवान् भगवान् विष्णु ने सब दिशाओं में उनको भग्न देखकर आदित्या वरण ने उस समय में अपनी सेवा से यह वाक्य कहा था ।।४१।। परमेश्री के गुणों से युक्त जिसने पहिले आयु का लाभ प्राप्त किया था उस अमोघ पृथिवी में स्वयं पद्मरज हैं नमस्कार करो ।।४२।।

एवमुक्त्वा गरुत्मन्तमारुरोह हरिस्तदा ।
शंखचक्रगदापाणिः पीतवासा जनार्दनः ।।४३
मतो हरिहरं यूद्धमभवल्लोमहर्षणम् ।
युयुधाते भृशं दिव्यं परस्पर जिघांसया ।
दिव्यं वर्ष सहस्रं तु तयोर्युद्धमभूत्तदा ।।४४
अन्योऽन्यातिशयोपेतौ तदालोक्य पितामहः ।
उवाच शाम्यतामस्त्रे स्वस्वभावेन सुव्रते ।।४५

Digitization by Arya Samaj Charitable Foundation, Chennai

एवं ते ब्रह्मणा प्रोक्ते शान्तभावं प्रजग्मतुः ।
अथ विष्णुपरौ ब्रह्मा वाक्यमेतदुवाच ह ।।४६
उभौ हरिहरौ देवौ लोके ख्यातिं गमिष्यथः ।
अयं च यज्ञो विध्वस्तः सम्पूर्णत्वं गमिष्यति ।।४७
दक्षस्य ख्यातिमाँल्लोके सन्तत्यायं भविष्यति ।।४८
एवमुक्त्वा हरिहरौ तदा लोके पितामहः ।
ब्रह्मा लोकानुवाचेदं रुद्रभागोऽस्य दीयताम् ।।४९

इस प्रकार से कहकर उस अवसर पर भगवान् हरि ने गरुण पर समारोहण किया था भगवान् जनार्दन पीताम्बर धारण किये हुए थे और उनके करकमलों में शंख चक्र और गदा धारण करने वाले थे ।।४३।। इसके अनन्तर हरिवृदौर हर का बड़ा लोमहर्षण युद्ध हुआ था । दोनों ने परस्पर में हवन करने की इच्छा से बहुत ही दिव्य युद्ध किया था । दिव्य एक सहर्ष वर्ष पर्यन्त उस समय में उन दोनों का युद्ध हुआ था ।।४४।। परस्पर में अतिशय से समुपेरा उन दोनों को उस समय में पितामह ने देखा था । हे सुव्रते ! ब्रह्मा जी ने कहा था अपने-अपने भाव से अब अस्त्रों को शमन कीजिए ।।४५।। इस नीति से ब्रह्माजी के द्वारा कहे जाने पर वे दोनों शान्त मान को प्राप्त हो गये थे । इसके अनन्तर ब्रह्माजी ने भगवान् विष्णु और हर से यह वाक्य कहा था ।।४६।। आप दोनों हरि और हर देवेश्वर लोक में परमाधिक ख्याति को प्राप्त करो, में और जो यह यज्ञ बिध्वस्त किया था वह भी सम्पूर्णता को प्राप्त कर लेगा ।।४७।। यह वृक्ष प्रजापति की सन्तति से लोक में स्वाभिमान् अर्थात् परम प्रसिद्ध होंगे ।।४८।। उस समय में लोक पितामह ब्रह्माजी ने हरि और हर से यह इसीलिये कहकर उन्होंने फिर कहा था कि इसका रुद्रभाग दे दीजिए ।।४९।।

रुद्रभागो ज्येष्ठभाग इतीयं वैदिकी श्रुतिः ।
स्तुतिं च देवाः कुरुत रुद्रस्य परमेष्ठिनः ।।५०

Digitization by Arya Samaj Charitable Foundation, Chennai

येनायं वः प्रसन्नात्मा वरदत्वं भजत ह ।
एवमुक्तास्तु ते देवाः स्तोत्रं शम्भोर्महात्मनः ॥५१
चक्रुः परमया भक्त्या नमस्कृत्य स्वयम्भुवे ॥५२
नमो विषमनेत्राय नमस्ते त्र्यम्बकाय च ।
नमः सहस्रनेत्राय नमस्ते शूलपाणये ॥५३
नमः खट्वाङ्गहस्ताय नमस्ते दंड धारिणे ।
त्वं देव हुतभ्ज्वालाकोटि भानुसम प्रभः ॥५४
अदर्शने वयं देव मूढ विज्ञानतोऽधुना ॥५५
नमस्त्रिनेत्रर्तिहराय शंभो त्रिशूलपाणे विकृतास्वरूप ।
समस्त देवेश्वर शुद्धभाव प्रसीद रुद्राच्युत सर्व भाव ॥५६
पूष्णोऽस्य दन्तान्तक भीमरूप प्रलम्व भोगीन्द्र मनोज्ञ कण्ठ ।
विशालदेहाच्युत नीलकण्ठ प्रपाहिनः सर्व गुणोपपन्न ॥५७
सिताङ्गरागाप्रतिपन्नमूर्ते कपालधारिस्त्रिपुरघ्न देव ।
प्रपाहिनः सर्वभयेषु चैवमुमापते पुष्कर नाल जन्म ॥५८

रुद्रदेव का सबसे बड़ा भाग होना है-—यह वैदिकी श्रुति है । हे देवो ! परमेष्ठी रुद्रदेव की आप लोग स्तुति करें ॥५०॥ जिससे यह प्रसन्न आत्मा वाले होकर आप लोगों का वरदाता हो जावें । इस तरह से जब देवगणों से कहा गया था तो उन समस्त देवताओं ने महान् आत्मा वाले भगवान् शम्भु का स्तवन किया था और परमाधिक भक्ति की भावना से उन्होंने शम्भू के लिये प्रणाम किया था ॥५१॥५२॥ अब वहास्त्रोत वनलाया जाता है—विषम नेत्रो वाले प्रभु के लिए नमस्कार है—अम्बक भगवान् की सेवा में प्रणाम है—सहस्रों नेत्रों के धारी प्रभु को मेरा प्रणाम है—हाथ में त्रिशूल धारण करने वाले के लिये नमस्कार है ॥५३॥ खट्वाङ्ग धारी को नमस्कार है तथा दण्ड रखने वाले के लिये प्रणाम है । हे देव ! आप अग्नि की करोंणों ज्वाला और भानु के समान प्रभा वाले हैं आपके अदर्शन में हम विज्ञान से इस समय

Digitization by Arya Samaj Charitable Foundation, Chennai

में मूढ़ है ॥५४॥५५॥ हे त्रिनेत्र शम्भो ! आर्तिक हरण करने वाले आपको प्रणाम है। हे विकृत स्वरूप वाले ! आप करकमल में त्रिशूल रखते हैं और आप समस्त देवों के ईश्वर हैं—आप का भाव परम शुद्ध हैं। हे सर्वभाव ! हे रुद्र ! हे अच्युत ! आप प्रसन्न होइए ॥५६॥ आप पूषा के दाँतों का विनाष करने वाले हैं—आपका महान् भीम स्वरूप है—आपका कण्ठ परम सुन्दर है और आप भोगिन्द्रों को अपने शरीर पर लटकाये रहा करते हैं। आपका देह परम विशाल है—हे अच्युत ! हे नीलकण्ठ ! आप समस्त गुण गणों से समन्वित हैं—आप हमारा परित्राण कीजिए ॥५७॥ आप सिव अङ्गराग से प्रति यन्त्र मूर्ति वाले हैं—आप कपालों की माला को धारण करने वाले हैं—आप त्रिपुर असुर के हनन करने वाले हैं हे देव ! आप सभी भयों में हमारी रक्षा कीजिए। आप उस देवी के स्वामी हैं और आपका पुष्कर की नाल से जन्म हुआ है ॥५८॥

पश्यामि ते देहगतान्सुरेस सर्गाद्यकान् वेदवराननन्त।
साङ्गान् सविधान सपदक्रमांश्च सर्वा निलानास्त्वयि देवदेव ॥५६
भव शर्व महादेव पिनाकिन् रुद्र ते हर।
नताः स्म सर्वे विश्वेश त्राहि नः परमेंश्वर ॥६०
इत्थं स्तुतस्तदा देवैर्देवो महेश्वरः।
तुतोष सर्वदेवानां वाक्यं चेद मुवाच ह ॥
भगस्य नेत्रं भवतु पूष्णो दन्तास्तथामुखे।
दक्षस्याच्छिद्रतां यातु यज्ञश्चाप्यदितेः सुताः ॥६२
पशुभावं तथा चापि अपनेष्यामि वः सुराः।
मद्दर्शनेन जात. पशुभावो दिवौकसाम् ॥६३
स मयापहृतः सद्यः पतित्वं वो भविष्यति।
अहं च सर्वविघानां पतिराद्यः सनातनः ॥६४
अहं वै पतिभावेन पशुमध्ये व्यवस्थितः।
अतः पशुपतिनाम मम लोके भविष्यति ॥६५

Digitization by Arya Samaj Charitable Foundation, Chennai

हे देवों में श्रेष्ठ ! हे अनन्त ? हे सुरेश्वर ! मैं आपके देह में गत स्वर्गादिक का अवलोकन कर रहा हूँ। हे देव देव ! साङ्ग— विपाओं के सहित पद क्रमों से युक्त ये सभी आपके देह में विलीन रहा करते हैं ॥ ५९ ॥ हे भवीहे ! हे शर्व ! हे महादेव ! हे पिनाकिन् ! हे रुद्रदेव ! हम सब आपके चरणार विन्दो में प्रणत हैं। हे परमेश्वर ! आप तो विश्व के ईश हैं। हमारी रक्षा कीजिए ॥६०॥ इस रीति से जब देवों के द्वारा स्तुति की गयी थी तो उस समय में महेश्वर प्रभु परम सन्तुष्ट हो गये थे और उन्होंने देवगणो से यह वाक्य कहा था। ॥६१॥ हे अदिति के पुत्रो ! भग के नेत्र हो जावें—पूषा के मुख में दाँत हो जावें तथा प्रजापति दक्ष का यज्ञ परिपूर्ण हो जावे ॥६२॥ हे सुरो ! मैं आपके पशु भाव का भी अपनयन कर दूँगा। मेरे दर्शन करने से जो भी देवों को पशु भाव हो गया था ॥६३॥ वह पशु भाव मैंने तुरन्त ही अपहृत कर दिया है और अब आप लोगों की पतित्व हो जायगा। मैं सभी विद्याओं का आद्य पति सनातन हूँ ॥६४॥ निश्चित रूप से पशुओं के मध्य में पतिभाव से व्यवस्थित रहता हूँ। इसीलिये मेरे लोक में मैं पशुपति नाम बाला हो जाऊँगा ॥६५॥

ये मां यजन्ति तेषां स्यादीक्षा पशुपतो भवेत् ।
एवमुक्ते तु रुद्रेण ब्रह्मा लोक पितामहः ॥६६
उवाच रुद्रं सस्नेह स्मितपूर्वमिदं वचः ।
ध्रुव पशुपतिर्देव त्वां लोक ख्यातिमेष्यसि ॥६७
अयं च देवस्तन्नाम्ना लोके ख्याति गमिष्यति ।
आराण्यश्च समस्तानां लोकादीनां गमिष्यति ॥६८
एवमुक्त्वा तदा ब्रह्मा दक्षं प्रोवाच बुद्धिमान् ।
गौरीं प्रयच्छ रुद्राय पूर्वमेवापेपादिताम् ॥६९
एवमुक्त्वा तदा देवस्तां कन्यां दक्षसन्निधौ ।
ददौ रुद्राय महते गौरीं परम शोभनाम् ॥७०

Digitization by Arya Samaj Charitable Foundation, Chennai

दक्षस्य च प्रियं कुर्वन् बहुमान पुरः सरम् ।
गृहीतायां तु कन्यायां दाक्षायण्यां पितामहः ।।७१
दादौ रुद्राय निलयं कैलासं सुर सन्निधौ ।
रुद्रोऽपि प्रययौ भूतैः समं कैलास पर्वतम् ।।७२

जो भी मानव मेरा यजन किया करते हैं। उनको पशुपति दीक्षा हो जाया करती है। इस तरह से रुद्रदेव के द्वारा कहने पर लोक पिता मह ब्रह्मा की रुद्रदेव से स्मित पूर्वक स्नेह से समन्वित वचन बोले थे—हे पशुपति देव ! निश्चय ही आप लोक में ख्याति को प्राप्त करेंगे। ।।६६।।६७।। और यह देव उसी नाम से लोक में प्रसिद्धि प्राप्त करेंगे। और यह समस्त लोकों के परम आराधना करने के योग्य हो जाँयगे। इस प्रकार से कहकर फिर बुद्धिमान् ब्रह्माजी ने दक्ष प्रजापति से कहा था। हे दक्ष ! अब आप गौरी को रुद्रदेव के लिये दे दो क्योंकि यह तो पूर्व में ही प्रतिपादित हुई है ।।६८।।६९। यह कहकर उसी समय में देव ने दक्ष की सन्निधि में उस कन्या को रुद्रदेव के लिये दे दिया था। जो रुद्र महान् थे और वह ब्रह्म गौरी परम शोभन थी ।।७०।। वह भाव पूर्वक दक्ष का हित करते हुए दाक्षायणी कन्या के गृहीत किये जाने पर पितामह ने रुद्रदेव को सुरों की सन्निधि में कैलास पर्वत पर निवास स्थान दिया था। फिर वे रुद्रदेव भी अपने भूतगणों के साथ कैलास पर्वत पर गमन करके वहाँ पर चले गये थे ।।७१।।७२।।

२२–गौरी और शिव का विवाह

तस्मिन्निवसतस्तस्य रुद्रस्य परमेष्ठिनः ।
चुकोप गौरी देवस्य पितुर्वैरमथास्मरत् ।।१
चिन्तयामास देवस्य त्वनेनपहृत पुरम् ।
यज्ञो विध्वंसितो यस्मात्तस्माद्देह त्यजाम्यहम् ।।२

Digitization by Arya Samaj Charitable Foundation, Chennai

आराध्य तपसा तस्य गृहे भूत्वा व्रजाम्यहम् ।
कथं गच्छामि पितरं दक्ष भयित वान्धवम् ॥३
भवपत्नी च दुहिता एवं संचिन्त्य सुन्दरी ।
जगाम तपसे देवी हिमवन्तं महागिरिम् ॥४
तत्र कालेन महता क्षपयन्ती कलेवरम् ।
स्वशरीराग्निरा दग्ध्वा ततः शैलसुताभवत !
उमा नाम्नाति महती कृष्णा चेत्यमिधानतः ॥५
लब्ध्वा तु शोभनां मूर्तिं हिमवन्त गृहे शुभाम् ।
पुनस्तप श्चकारोग्रं देवं स्मृत्वा त्रिलोचनम् ॥६
असावेव पतिर्मह्यमित्युक्त्वा तपसि स्थिता ।
कुर्वन्त्या तत्तपश्चोग्रं हिमवन्ते महागिरौ ॥७

उस कैलास पर्वत पर निवास करने वाले देवेश्ववर परमेष्ठी रुद्र देव के ऊपर गौरी ने अपने पिता दक्ष के बैर का स्मरण करके बहुत ही कोप किया था उस देवी ने ऐसा ही चिन्तन किया था कि इन्हीं देव ने पुट का अपहरण किया था और मेरे पिता के यज्ञ का विध्वंस किया था। इसी कारण से मैं अपने इस देह को परित्यक्त किये देती हूँ ॥१॥ ॥२॥ तपश्चर्या के द्वारा आराधना करके उनके गृह में रहूँगी—अत. अब मैं गमन करती हूँ। किन्तु अपने पिता दक्ष के समीप में मैं कैसे गमन करूं क्योंकि वह वान्धवों से क्षीण हो गये हैं ॥३॥ मैं दक्ष की पुत्री हूँ और सुन्दरी भव की पत्नी हूँ। यह सोच विचार करके वह देवी महा गिरि हिमवान् पर तप करने के लिये चली गयी थी ॥४॥ वहाँ पर बहुत अधिक समय तक अपने कलेवर का क्षीण करती हुई उसने अपने ही शरीर से समुद्भूत अग्नि के द्वारा अपने शरीर को दग्ध करके भस्मसाद् हो गई थी और वह फिर शैल हिमाचल की ही पुत्री के रूप में जन्म ग्रहण करने वाली हुई थी। वह उमा के नाम से बड़ी हुई थी तथाभी उसका शुभ नाम था ॥५॥ हिमवान् के घर में परम शुभ और

Digitization by Arya Samaj Charitable Foundation, Chennai

परम शोभन मूर्त्ति का लाभ करके उसने त्रिलोचन देव का स्मरण करके पुनः तपस्या की थी ।।६।। यही भगवान् शम्भु मेरे पति होवें यही अपने मन में संकल्प करके वह तपश्चर्या में स्थित हो गयी थी । वह हिमवान् महान् गिरि पर ही महान् उग्र तप कर रही थी ।।७।।

कालेन महता देवस्तपसा राधितस्तया ।
आजगामाश्रमं तस्या विप्रोभूत्वा महेश्वरः ।।८
वृद्धः शिथिलसर्वाङ्गः स्खलंश्चैव पदे पदे ।
कृच्छ्रात्तस्यः समीपं चाप्यागत्य द्विजसत्तमः ।
वुभुक्षि तोऽस्मि मे देहि भद्रे भोज्यं द्विजस्य तु ।।९
एवमुक्ता तदा कन्या उमा शैलसुता शुभा ।
उवाच ब्राह्मणं भोज्यं दद्मि विप्र फलादिकम् ।
कुरु स्नान द्रुतं विप्र भुंजस्वान्नं यहच्छया ।।१०
एवमुक्तस्तदा विप्रस्तस्याः पार्श्वे महानदीम् ।
गङ्गा जगाम स्नानार्थी स्नानं कर्त्तुमेवातरत् ।।११
स्नानं तु कुर्वता तेन रुद्रेण द्विजरुपिणा ।
भूत्वा मायामयं भीमं मकरं भयदर्शनम् ।
ग्राहितस्तु तदा विप्रस्तेन दुष्टेन मद्गुना ।।१२
दृष्ट्वा धृतमथात्मानं मकरेण बलीयसा ।
वृद्धमात्मा नमथ तां दर्शयन्वाक्यमब्रवीत् ।।१३
अब्रह्मण्यङ्कृतं कन्ये त्रायस्व मामतो त्ताषात् ।
यावन्न याति विकृति तावन्मांत्रा तु मर्हसि ।।१४

बहुत काल के व्यतीत हो जाने पर भी उसने तपश्चर्या के द्वारा देवेश्वर की आराधना की थी । फिर महेश्वर प्रभु उसके हृदय के सत्य-भाव को जानने के लिये एक विप्र का स्वरूप धारण करके उसके आश्रम में समागत हुए थे ।।८।। वह विप्र का स्वरूप भी ऐसा था कि सभी शरीर के अङ्ग उसके शिथिल थे तथा पद-पद में वह स्थलित होता

Digitization by Arya Samaj Charitable Foundation, Chennai

था—ऐसा वह विप्र बड़ी कठिनाई से उस देवी के समीप में समागत हुआ था। उसने वहाँ पहुँच कर उमा देवी से कहा था—हे भद्रे ! मैं भूखा हूँ। आप इस विप्र को कुछ भोज्य प्रदान कीजिए ॥९॥ जब इस प्रकार से उस कहा गया तो उस परम शुभा शैल की पुत्री उमा ने उस ब्राह्मण से कहा था—हे विप्र ! मैं फल आदि भोज्य आपको दे रही हूँ। हे विप्र ! आप शीघ्र स्नान करिये और इच्छा पूर्वक अन्न का भोजन करिये ॥१०॥ इस तरह से उस कहे हुये विप्र ने पाश में ही महान ही जो भागीरथी गङ्गा थी वहाँ पर वह चला गया था। वहाँ पर स्नान करने के लिये उसने उस गङ्गा में अवतरण किया था ॥११॥ स्नान करते हुए उन द्विज रूपी रुद्र देव ने एक माया से परिपूर्ण मकर का स्वरूप धारण कर लिया था जो देखने में वहुत ही भयानक था। उस समय में वह विप्र ग्राहित हो गया था और दुष्ट मकर ने उनको पकड़ लिया था जो अपनी ही माया से बना दिया गया था ॥१२॥ उस वलवान् मकर के द्वारा अपनें आपको पकड़ा हुआ देखकर उस देवी को अपने आपके स्वरूप को वृद्ध दिखाते हुए यह वाक्य उसने देवी उमा से कहा था ॥१३॥ हे कन्ये ! मैं ब्राह्मण इस समय में अक्षित हो गया हूं। इस मकर से महान भय से मेरी रक्षा करो। जब तक मेरा शरीर विकृत न होवे तभी तक आप मुझे बचाइए अर्थात् मेरा परित्राण करने की कृपा कीजिए ॥१४॥

एवमुक्त्वा तदा कन्या चिन्तयामास पार्वती।
पितृभावेन शैलेन्द्रं भर्तृभावेन शंकरम्।
स्पृशामि तपसा पूता कथं विप्रं स्पृशाम्यहम् ॥१५
यद्येनं नापकर्षामि मकरेण जले धृतम्।
तदानी ब्रह्मवध्या मे भविष्यति न संशयः ॥१६
अन्यं व्यतिक्रमे धर्ममपनेतुं च शक्यते।
ब्रह्मवध्या पुनर्नैभेववमुक्त्वा गतांजसा ॥१७

Digitization by Arya Samaj Charitable Foundation, Chennai

सा गत्वा त्वरितं भीसर्गृहीत्वा पाणिना द्विजम् ।
चकर्षान्तर्जलत्तावत्स्वयं भूतपतिर्हरः ॥१८
यमाराध्य तपश्चर्त्तुमारब्धं शैलकन्यया ।
सा एव भगवान् रुद्रस्तस्याः पाण्यलन्वितः ॥१९
तं दृष्ट्वा लज्जिता देवी पूर्वत्यागमसस्मरत् ।
न किंचिदुत्तरं सुभ्रूः वदति स्य सुलज्जया ॥२०
तूष्णीम्भूतां तु तां दृष्ट्वा गौरीं रुद्रो हसन्निव ।
पाणौगृहीत्वा मां भद्रे कथं त्यक्तुमिहार्हसि ॥२१

इस प्रकार से जब उस देवी से कहा गया था तो उस कन्या पार्वती के मन में विचार किया था। मैं अपने पिता के भाव से शैलेन्द्र का स्पर्श किया करती हूँ और अपने भर्त्ता के भाव से मैं भगवान शँकर का स्पर्श किया करती हूँ। अब तप से पवित्र हुई मैं इस विप्र का स्पर्श कैसे कर सकती हूँ ॥१५॥ यदि मैं इसका अपकर्षण नहीं करती हूँ जो जल में मकर के द्वारा पकड़ा गया है तब तो मैं ब्रह्म वध्या हो जाऊँगी-इसमें कुछ भी संशय नहीं है ॥१६॥ इस व्यतिक्रम में अन्य धर्म का अपनयन करने का कोई भी साधन नहीं हो सकता है। इस प्रकार से ब्रह्म हत्या का दोष फिर नहीं होता है—ऐसा कहकर वह शीघ्र ही वहाँ गयी थी ॥१७॥ उस भीरु ने वहाँ पहुँच कर शीघ्र ही अपने हाथ से द्विज को ग्रहण करके जब तक जल के अन्दर से उस द्विज को खींचा था तब तक भूतपति शम्भु स्वयं प्रकट हो गये थें। और उन्होंने कहा था--जिसका आराधन करके शैल कन्या के द्वारा तपश्चर्या का करना आरम्भ किया था वह ही साक्षात् भगवान् रुद्र उसके कर से अवलम्बित हो गये हैं ॥१९॥ उन भगवान् शम्भु का दर्शन करके वह देवी लज्जित हो गई थी और उसने पूर्व में किये हुए त्याग का स्मरण किया था। उस सुभ्रू ने अत्यधिक लज्जा से कुछ भी इसका उत्तर उनको नहीं दिया था।२०। उस गौरी को चुप हुई देख कर रुद्रदेव हँसते हुए गौरी का हाथ पकड़

Digitization by Arya Samaj Charitable Foundation, Chennai

कर कहने लगे थे—हे भद्रे ! आपने मुझे हाथ से पकड़ कर ऊपर किया था अब आप मुझे कैसे त्याग करने के योग्य हो रही हो ।।२१।।

मत्पाणिग्रहणं भद्रे वृथा यदि करिष्यसि ।
तदग्नीं ब्रह्मणः पुत्र्यामाहारार्थी ब्रवीम्यहम् ।।२२
न भवेत्परिहासोऽयमुक्तं देवी परंपरा ।
लज्जमाना तदा वाक्यं वदति स्मितपूर्वकम् ।।२३
देवदेव त्रिलोकेश त्वदर्थोऽयं समुद्यमः ।
प्राग्जन्माराधितो भर्त्ता भवान्देवो महेश्वरः ।।२४
इदानीं मे भवान्देवः पतिर्नाम्यो भविष्यति ।
किन्तु स्वामी पिता मह्यं शैलेन्द्रो मे व्रजामि तत् ।।२५
अनुज्ञाप्य विधानेन ततः पाणिं गृहीष्यसि ।।२६
एवमुक्त्वा तदा देवी पितरं प्रति भामिनी ।
कृतांजलिपुरा भूत्वा हिमवन्त मुवाच ह ।।२७
इतोऽन्यजन्मभर्त्ता मे रुद्रो दक्षमखान्तकः ।
इदानीं तपसा सैव ज्ञातोऽभूत्गतिभावतः ।।२८

शिव देव ने कहा—हे भद्रे ! मेरे पाणि के ग्रहण को यदि आप वृथा करेंगी तब तो मैं ब्रह्माजी की पुत्री के समीप आहार के लिये जाता हूँ - मैं यह कहता हूं ।।२२।। यह परिहास न हो जावे—ऐसा जब कहा था तो परापरा देवी लज्जभान होती हुई स्मित पूर्वक उस समय में कहती है ।।२३।। हे देवों के देव ! आप तो त्रिलोकी के स्वामी हैं । यह मेरा समुद्यम तो आप ही के लिये था । आप मेरे पूर्व जन्म में आराधित देव भर्त्ता हैं और आप महेश्वर हैं ।।२४।। इस समय में आप ही देव मेरे भर्त्ता हैं और अन्य कोई भी नहीं होगा । किन्तु मेरे पिता शैलेन्द्र हैं वे ही मुझे स्वामी को प्रदान करेंगे मैं अब उन्हीं के समीप में गमन करती हूँ ।।२५।। उनको अनुज्ञापित करके ही विधि-विधान के द्वारा ही आप मेरा पाणिग्रहण करेंगे ।।२६।। उस समय में

Digitization by Arya Samaj Charitable Foundation, Chennai

इस प्रकार से कह कर वह भामिनी देवी अपने पिता के पास गयी थी और हाथों को जोड़कर उस उमा ने पिता से कहा था ।। २७ ।। उमा नेकहा था—इससे पूर्व जन्म में मेरे भर्त्ता रुद्रदेव थे जिन्होंने दक्ष के यज्ञ का विध्वंस किया था। इस समय में तप के द्वारा गति भाव से उनका ही ज्ञान प्राप्त हो गया है ।। २८ ।।

स च विश्वपतिर्भूत्वा ब्राह्मणो मे तपोवनम् ।
आगत्य भोजनार्थी मां याचयामास शङ्करः ।।२६
मया स्नातुं व्रजस्वेति चोदितो जाह्नवीं गतः ।
तत्रासौ वृद्धभावेन द्विजरूपेण शङ्करः ।
मकरेण धृतः पूर्वमब्रह्मण्यमुवाच ह ।।३०
ब्रह्महत्याभयात्तात मया पाणौ धृतस्ततः ।
धृतमात्रः स्वकं देहं दर्शयामास शंकरः ।।३१
ततो मामब्रवीद्देवः पाणिग्रहणमागतम् ।
भवती देवि किंचिद्विचारय तपोधने ।।३२
एवमुक्ता त्वहं तेन शंकरेण महात्मना ।
तमनुज्ञाप्य देवे शंभवन्तं प्रष्टुमागता ।।३३
इदानीं पत्क्षमं कार्यं तच्छीघ्रं संविधीयताम् ।।३४
एवं श्रुत्वा तदा वाक्यं शैलराजो मुदा युतः ।
ऊचे दुहितरं कन्यां तस्मिन्काले वरानने ।।३५

वे सम्पूर्ण विश्व के पति है तो भी ब्राह्मण का स्वरूप धारण करके मेरे पास तपोवन में समागत हुए थे और उन भगवान् शङ्कर ने वहाँ आकर भोजन के लिये मुझसे याचना की थी ।।२६।। मेरे द्वारा उस समय में उनको प्रेरणा दी गयी थी कि स्नान करने के लिये जाइए। और वे स्नान के लिये गङ्गा नदी पर गये थे। वही पर इन्हीं भगवान् शिव ने वृद्ध भाव से जो कि एक द्विज के स्वरूप में थे एक मायामय मकर के द्वारा पकड़े गये थे। उन्होंने उसी समय में मुझसे कहा था कि

Digitization by Arya Samaj Charitable Foundation, Chennai

यह अब्रह्मण्य होगा अर्थात् ब्राह्मण रक्षा न करने का महान् पाप होगा ॥३०॥ हे तात ! ब्राह्मण की हत्या के पाप के भय से मैंने इनको हाथ से पकड़ कर खींच लिया था। जैसे ही मैंने इनका हाथ पकड़ा था। उसी क्षण में भगवान् शङ्कर ने मुझे अपने साक्षात् स्वरूप का दर्शन करा दिया था ॥३१॥ उस समय में देवेश्वर ने मुझसे कहा था-- यह योपाणि ग्रहण हो गया है। हे तपोधने ! अब आप कुछ भी अपने हृदय में विचार न कीजिये। उन देवेश्वर शङ्कर ने मुझ से इसी प्रकार से कहा था और मैं आप की अनुज्ञा प्राप्त करने के लिये आप से पूछने के ही लिये यहाँ पर समागत हुई हूँ ॥३२॥३३॥ इस समय में जो भी क्षय कार्य हो उसी को आप शीघ्र ही करिये ॥३४॥ उस समय में इस तरह के वाक्य का श्रवण करके शैरभ राज परम प्रसन्नता से युक्त हो गये थे और उन्होंने उस समय में अपनी पुत्री कन्या से कहा था—हे वरानने ! ॥३५॥

पुत्रि धन्योऽस्म्यहं लोके यस्य रुद्र स्वयं हरः।
जमाता भविता देवस्त्वयाऽपत्यवदस्म्यहम् ॥३६
स्थापितो मूर्ध्नि देवानामपि पुत्रि त्वया ह्यहम्।
स्थयितां क्षणमेक तु यावदागमन मम ॥३७
एवमुक्त्वा गतो राजा शैलानां प्रह्मणोऽन्तिकम्।
तत्र दृष्ट्वा महात्मानं सर्वं देवपितामहम् ॥३८
उवाच प्रणतो भूत्वा ब्रह्माणं शैलराट् ततः।
देव्रोमा दुहिता मऽद्य तां रुद्राय ददाम्यहम् ॥३९
प्रयच्छोवाच देवानां तदा लोकपितामहः ॥४०
एवमुक्तः शैलराजः स्ववेश्मागम्य सत्वरम्।
तुम्बुरुं नारदं चैव हाहा हूहू मथाह्वयत् ॥
स गत्वा किन्नरांश्चैव असुरान् राक्षसानपि ॥४१
पर्वता सरितः शैला वृक्षओषधयस्तथा।

Digitization by Arya Samaj Charitable Foundation, Chennai

आगता मूनिमन्तो वै पर्वताः सङ्गभोपालाः ।
हिमवत्कन्यकां द्रष्टुं विवाह शंकरेण ह ।।४२

हे पुत्रि ! मैं परम धन्य लोक में हूं जिसके जामाता रुद्र हर स्वयं हीं हो जावें । हे देवि ! मैं तो परम भाग्य वाला हूँ और आपके ही द्वारा सन्तति वाला हो गया हूँ ।। ३६ ।। हे पुत्रि ! तेरे द्वारा मैं देवों के भी मस्तक पर स्थापित किया गया हूँ । जब तक मेरा आगमन होवे तब तक एक क्षण तुम यहीं पर स्थित रहो ।। ३७ ।। उस शैलों के राजा ने इस प्रकार से कहकर फिर वह ब्रह्माजी के समीप में गया था । वहाँ पर उसने सब देवों के पितामह का दर्शन किया था और उस शैलों के राजा ने प्रणत होकर ब्रह्माजी से कहा—मेरी जो देवी दुहिता है उसको रुद्र देव के लिये प्रदान कर रहा हूँ । उस समय में लोकों तथा देवों के पिता ने कह दिया था तुम उस देवी को रुद्र देवी को रुद्र देव के लिये प्रदान करदो ।। ३८ ।। ३९ ।। ४० ।। इस तरह से कहे गये शैलराज वहुत ही शीघ्र अपने घर में वापिस आग ये थे । इसके अनन्तर वहाँ पर तुम्वरू—नारद—ही ही हू हू—नाम वालों के पास बुलाने को वह शैल राज गया था । किन्नरों को—असुरों को और राक्षसो को भी वहाँ पर विवाहोत्सव में उस शैलों के राजा ने बुलाया था वहाँ पर सभी पर्वत—नदियाँ—शैल—वृक्ष—और औषधियाँ सभी मूर्त्तिमान् होकर सङ्गमोपल सभी हिमवान् की कन्या का भगवान् शङ्कर के साथ उस विवाहोत्सव को देखने के लिये वहाँ पर समागत हुये थे ।।४१।।४२।।

तत्र वेदि क्षितिश्चासीत् कलशाः सप्त सागराः ।
सूर्यो दीपस्तथा सोमः सरितो ववहुर्जलम् ।।४३
एवं विवाहसामग्रीं कृत्वा शैलवराधिपः ।
प्रेषयामास रुद्राय समीपं मन्दरं गिरिम् ।।४४
स तदा शङ्करोक्तस्तु मन्दरो द्रुतमाययौ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

विधिना सोमया पाणिं जग्राह परमेश्वरः ।।४५
तत्रोत्सवे पर्वंत नारदौ गो जगुश्च सिद्धाननृतुर्वनस्पतीः ।
पुष्पाण्यनेकानि विचिक्षिपुः शुभा ननृतरुच्चैः सुरयोषितौ भृशम्
।।४६
तस्मिन् विवाहे सलिल प्रवाहे चतुर्मुखो लोकपरः स्वसंस्थः ।
उवाच कन्यां तव पुत्रि लोके नारीं सुभर्त्ता तव चान्यपुंसाम् ।४७
इत्येवमुक्त्वा स उमां स रुद्रां पितमहः स्वां पुरमा जगाम ।।४८
स वभूव यथाप्रोक्तं प्रजापालाय पृच्छते ।
ऋषिणा महता पूर्वं तपसा भावितात्मना ।।४९
गौर्या उत्पत्तिरेषा वै कथिता परमर्षिणा ।
विवाहश्च यथा वृत्तस्तत्सर्वं कथितं तव ।।५०

वहाँ पर उस विवाह के उत्सव में क्षिति ही देवी बनी थी और सात सागर ही सात कलश हुए थे। सूर्य और चन्द्र दीप बने थे तथा—सरिताओं ने जल का बहुत किया था ।। ४३ ।। शैलों के श्रेष्ठ राजा ने इस प्रकार से ही सम्पूर्ण सामग्री बना करके फिर उस हिमवान् ने मन्दर पर्वत को रुद्रदेव के समीप में भेजा था। उस समय में शङ्कर भगवान् के द्वारा कहा गया मन्दराचल शीघ्र ही वापिस आ गया था और विधि-विधान के साथ सोम पान करने वाले परमेश्वर ने उमा देवी का पाणिग्रहण किया था ।। ४४ ।। ४५ ।। वहाँ पर वन स्थली में पर्वत नारद दोनों ने गायन किया था और सिद्धों ने नृत्य किया था। देवाङ्गनाओं ने अनेक तरह के पुष्पों वृष्ठि की थी और नृत्य किया था ।। ४६ ।। उस विवाह में सलिल के प्रवाह में चतुर्मुख ब्रह्माजी लोक पर संस्थिय थे। उन्होंने कन्या से कहा था—हे पुत्रि ! लोक में तुम्हारा बहुत ही उत्तम भर्त्ता प्राप्त हुआ है जो अन्य पुरुषो में अत्यधिक श्रेष्ठ हैं ।। ४७ ।। उन ब्रह्माजी ने रुद्र देव के सहित उमा देवी को इस प्रकार से कहकर पितामह अपने पुर में आ गये थे ।। ४८ ।। वह जैसा कहा

Digitization by Arya Samaj Charitable Foundation, Chennai

गया है वैसे ही दान करने वाले प्रजापात के लिये हो गये थे। पूर्व में महान् तप से भावितात्मा ऋषि ने पूर्व में गौरी की यह उत्पत्ति कही थी। और उनका जैसे विवाह हुआ था बह मैंने आपको बतला दिया है ॥ ४६ ॥ ५० ॥

एतत्सर्वं तु गौर्या वै सम्पन्नं तु तृतीयया ।
तस्यां तिथौ तृतीयायां लवणं वर्जयेत्सदा ॥५१
यश्चोयोष्यति नारी वा सा सौभाग्यं तु विन्दति ॥५२
दुर्भगा या तु नारी स्यात्पुरुषश्चाति दुर्भगः ।
एतत् श्रुत्वा तृतीयायां लवणं तु विवर्जयेत् ॥५३
सवकामानवाप्नाति सौभाग्य द्रव्य सम्पदः ।
आरोग्यं च सदा लाक करति पुष्टि च विन्दति ।५४

गौरी का यह सब कार्य तृतीया तिथि में सुम्पन्न हुआ था। अतएव तृतीया में लवण को वर्जित कर देना चाहिए। और सदा ही लवण का त्याग कर देवे ॥ ५१ ॥ जो नारी तृतीया तिथि में उपवास किया करती है वह तारी सर्वदा सौभाग्य की प्राप्ति क्रिया करती है। वह नारी दुर्भगा होती है और पुरुष भी दुर्भग होता है जो तृतीया के महत्त्व को नहीं मानते हैं इसका श्रवण करके तृतीयातिथि में सदा ही लवण का त्याग कर देना चाहिए ॥ ५३ ॥ जो भी इस तृतीया में लवण का त्याग करके उपवास किया करते हैं वे अपनी सभी कामनाओं की प्राप्ति किया करते है तथा परम सौभाग्य—द्रव्य और सम्पदाओं को प्राप्त करते हैं। सदा आरोग्य और लोक में कीर्त्ति तथा पुष्टि को प्राप्त किया करते हैं। इसका इतना अधिक महत्त्व हुआ करता है ॥ ५४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

२३—गणपति जन्म

कथं गणपतेर्जन्म मूर्तिमत्त्वं च सत्तम ।
एतन्मे संशयं छिन्धि हृदि कष्ट व्यवस्थितम् ।।१
पूर्वं देवगणाः सर्वे ऋषयश्च तपोधनाः ।
कार्यारम्भं तथा चक्रुः सिद्धयन्ते च न संशयः ।।२
सन्मार्गवर्तिषु तथा सिद्धयन्ते विघ्नतः क्रियाः ।
असत्कारिषु सर्वेषु तवदेवमविघ्नतः ।।३
ततो देवाः सपितरश्चिन्तयामासुरोजसा ।
असत्कार्येषु विघ्नार्थे सर्व एवाभ्यमन्त्रयन् ।।४
ततस्तेषां तदा मन्त्रं कुर्वतां त्रिदिवौकसाम् ।
बभूव बुद्धिर्गमने रुद्रं प्रति महामतिम् ।।५
ते तत्र रुद्रमामन्त्र्य कैलासनिलयं गुरुम् ।
ऊचुः सविनयं सर्वे प्रणिपातपुरःसरम् ।।६
देवदेव महादेव शूलपाणे त्रिलोचन ।
विघ्नार्थमविशिष्टानामुत्पादयितुमर्हसि ।।७

हे श्रेष्ठतम ! भगवान् गणपति का जन्म कैसे हुआ था—इस मेरे संशय का आप छेदन कर दीजिए । यह मेरे हृदय में बहुत कष्ट दे रहा है जो कि व्यस्थित है ।। १ ।। पूर्व में अर्थात सबसे प्रथम सभी देवगण और तपोधन ऋषिगण गणपति का अर्चन करके ही किसी भी कार्य का आरम्भ किया करते थे । वे सभी कार्य सिद्ध हुआ करते हैं—इसमें कुछ भी संशय नहीं है ।। २ ।। सन्मार्ग के वर्त्तन करने वालों में विघ्न से क्रियाऐं सिद्ध हुआ करती हैं और जो असत्कारी हैं उन सब में उसी भाँति अविघ्न से होती हैं ।।३।। इसके अनन्तर देवों ने ओज से पितरों के सहित चिन्तन किया था । असत्कार्यों में विघ्न के लिये सभी ने इस प्रकार से मन्त्रणा की थी ।।४।। इसके अनन्तर देवों के इस तरह से मन्त्रणा करते हुओं को ऐसी बुद्धि समुत्पन्न हो गई थी कि महापति

Digitization by Arya Samaj Charitable Foundation, Chennai

रुद्रदेव के समीप में जाना चाहिए। ने ही इसके विषय में उचित मार्ग का प्रदर्शन कर देंगे। क्योंकि वे महान् मति वाले देवेश्वर हैं ॥ ५ ॥ वे सभी देवगण वहाँ पर रुद्रदेव के कैलास के निवास स्थान पर गुरुदेव के समीप में पहुँचे थे। और सब ने प्रणाम पूर्वक विनय के साथ भगवान शिव से प्रार्थना की थी ॥ ६ ॥ देवों ने कहा—हे देवों के देव! हे महादेव! हे शूलपाणे! हे त्रिलोचन! आप अविशिष्टों के विघ्नों के लिए उत्पादन करने को परम योग्य हैं ॥७॥

एवमुक्तस्तदा देवैर्भवः परमया मुदा ।
उमां निरीक्षयामास चक्षुषाऽनिमिषेण ह ॥८
देवानां सन्निधौ तस्य पश्यतस्तां महात्मनः ।
चिन्ताभूद व्योम्नि मूर्तिर्नो दृश्यते केन हेतुना ॥९
पृथिव्या विद्यते मृतिरयां मूर्तिस्तथैव च ।
तेजसः श्वसनस्यापि मूर्तिरेषा तु दृश्यते ॥१०
आकाशं च कथं नति मत्वा देवो जहास च ।
ज्ञानशक्तिः युमान् दृष्टः यद्दृष्टं व्योम्नि शम्भुना ॥११
यथोक्तं ब्रह्मणा पूर्वं शरीरं तु शरीरिणाम् ।
यच्चापि हसितं तेन देवेन परमेष्ठिना ॥१२
एतत्कार्यं चतुष्केण पृथिव्यादि चतुर्ष्वपि ।
मूर्तिमानाति तेजस्वी हसतः परमेष्ठिनः ॥१३
प्रदीप्तास्यो महादीप्तः कुमारो भासयन्दिशः ।
परमेष्ठिगुणैर्युक्त साक्षात् रुद्रहवा परः ॥१४

इस रीति से जब देवों के द्वारा शम्भु से प्रार्थना की गयी थी तो उसी समय में देवेश्वर शंकर ने परम आनन्द के साथ एक टक नेत्र से उमा देवी का निरीक्षण किया था ॥८॥ देवों की सन्निधि में उस उमा देवी को देखते हुए उन शंकर को ऐसी चिन्ता हुई थी कि किस कारण से व्योम में मूर्त्ति नहीं दिखलाई दिया करती है अर्थात् आकाश

Digitization by Arya Samaj Charitable Foundation, Chennai

की कोई भी मूर्त्ति न होने का क्या कारण है ॥६॥ पृथिवी की मूर्ति विद्यमान है—उसी भाँति जलों की भी मूर्त्ति होती है । तेज की और बायु की भी यह मूर्त्ति दिखलाई देती है ॥१०॥ इस आकाश की कोई मूर्त्ति क्यों नहीं है—यह विचार करके महादेव हँस गए थे । ज्ञान शक्ति वाला पुमान् देखा गया था जो कि शम्भु के व्योम में देखा था ॥११॥ ब्रह्माजी ने पूर्व में शरीर धारियों का जो शरीर जैसा कहा था । परमेष्ठी देव ने जो भी हास किया था । इस चार कार्यो से पृथिवी आदि चारों में भी हँसते हुए परमेष्ठी के द्वारा अति तेजस्वी मूर्त्तिमान् प्रदीप्त मुख से समन्वित—महान दीप्ति वाला कुमार दिशाओं को भासित करते हुए कुमार प्रकट हुए थे जो परमेष्ठी के गुणों से युक्त थे और साक्षात् दूसरे रुद्र के ही समान थे ॥१२—१४॥

उत्पन्न यात्रो देवानां व्युषितः संप्रमोहयन् ।
कान्त्यादीप्त्या तथा मूर्त्या रूपेण च महात्मवान् ॥१५
तं दृष्ट्वा परमं रूपं कुमारस्य महात्मनः ।
उमाऽनि मेषनेत्राभ्यां तमपश्यच्च भामिनी ॥१६
तं दृष्ट्वा कुपितो देवः स्त्रीभावं चंचलं तथा ।
मत्वा कुमाररुपं तु शोभनं मोहनं दृशाम् ॥१७
ततः शशाय तं देवो गणेशं परमेश्वरः :
कुमार गजवक्तृस्त्वं प्रलम्बजठरस्तथा ।
भविष्यसि तथा सर्पैरूपवीत गतिध्रुवम् ॥१८
एवं शशाय तं देवस्तोव्रकोय समन्वितः ।
धुन्वन् शरीरमुत्थाप्य ततो देवो रूषान्वितः ॥१६
यथा यथा सौ स्वशरीरमाद्यं धुनोति देवस्त्रिशिखास्त्रपाणिः ।
तथा तथा चाङ्गरूहाच्चकासे जलक्षिति संन्यपत्तत्तथान्यत् ॥२०
विनायकानेका विधा गजास्यास्तमाल नीलाञ्जन सन्निकाशाः ।
उत्तस्थुरूच्चैर्विविधास्त्रहस्ताः ततस्तु देवो मानसाकुलेन ।२१

उस कुमार ने केवल उत्पन्न होते ही जो कान्ति दीप्ति—मूर्त्ति और रूप के द्वारा महान् आत्मा वाले थें उन्होंने सब देवगणों को प्रमो-

Digitization by Arya Samaj Charitable Foundation, Chennai

हित कर दिया था। देवों ने उस महान आत्मा वाले कुमार का परम दिव्य रूप को देखकर तथा ऊषादेवी ने भी उस सुन्दर स्वरूप वाले को देखकर उस भामिनी ने निर्विभेद नेत्रों के द्वारा उसकी ओर देखा था। ।।१५।।१६।। उसको देखकर देवेश्वर परम कुपित हो गये थे और स्त्री भाव को चंचल मान कर दृष्टि को मोहित करने वाले कुमार के शोभन रूपको देखकर उन्होंने देदिया था अर्थात् परमेश्वर ने गणेशको शाप दिया था—हे कुमार ! तू गज के मुख वाला होजा और तेरी सूंड बहुत लम्बी हो जाये। तथा सर्पों के द्वारा उपवीत गति निश्चय ही हो जावे ।।१८।। इसी रीति से देव ने उनको शाप दे दिया था और परम तीव्र कोप से युक्त हो गये थे। फिर शरीर को कँपाते हुए फिर देवेश्वर क्रोध से संयुत हो गये थे ।१९। जैसे जैसे यह आद्य अपने शरीर को कम्पित करते थे वैसे-वैसे ही उनके अङ्ग रुह से जल व्यक्त होता था। देव ने अग्नि अस्त्र अपने हाथ में ग्रहण कर रक्खा था। तथा अन्य संनिपतित हुआ था ।।२०।। विनायक से अनेक प्रकार के गजमुख जो तमाल और नील अञ्जन समान थे। वे अस्त्रों को हाथों में धारण किए अनेकों ऊपर की ओर उत्थित हो गये थे। इसके अनन्तर देवेश्वर मन में अत्यधिक आकुल हो गए थे ।।२१।।

किमेतदित्यद्भुत कर्मकारी ह्येक करोत्य प्रतिमं महच्च।
कार्यं सुराणां कृतमतदिष्टं भवेदथैनं परितः कुतस्तत् ।।२२
दिवौकसां चिन्तयतां तथा तु विनायकैः क्ष्मा क्षुभिता बभूव।
चतुर्मुखश्चा प्रतिमं विमानमारूह्यखे वाक्यमिदं जगाद् ।।२३
धन्या स्थ देवाः सुरनायकेन त्रिलोचनेनाद्भुत रूपिणा च।
अनुगृहीताः परमेश्वरेण सुरद्विषां विघ्नकृतां न तौ च ।। २४
इत्येवमुक्त्वा प्रपितामहस्तानुवाच देवस्त्रिशिखास्त्रपाणिम्।
यस्ते विभो वस्तृ समुद्भवः प्रभुः विनायकानां भव सन्त्विमेऽनुगाः ।।२५
भवान्तथास्यात्मवरेण चाम्बरे त्वया चतुर्व्वस्तु शरीर चारी।
आकाशमेतद्वहुधा व्यवस्थितं त्वया चैको वदतां तेऽपयाताः ।।२६

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रभुर्भव त्वं प्रतिमास्त्र पाणिना इमानि चास्त्राणि वरांश्च देहि ।
इत्येव मुक्त्वा विगते पितामहे त्रिलोचनश्चात्य भवं जगाद ।।२७

यह अत्यन्त अद्भुत कर्म के करने वाला है। यह एक ही अनुपान और महान् कार्य कर रहा है। सुरगणों का कार्य कर रहा है। यह इष्ट हो गया है। इसके चारों ओर यह वया है ।।२२। देवगणों के चिन्तन करते हुये होने पर यह पृथ्वी परम क्षुभित हो गई थी। चतुर्मुख अप्रतिम विमान में समारूढ़ होकर उन्होंने आकाश में यह वाक्य कहा था ।।२३।। हे देवो ! आप लोग परम धन्य हैं। अद्भुत रूप वाले सुरनायक त्रिलोचन के द्वारा आप अनुगृहीत हुये हैं। परमेश्वर ने आप लोगों पर बड़ी कृपा की है। विघ्नों को करने वाले सुरों के द्वेषी असुर उनके आगे नहीं रहेंगे ।२४।। इस प्रकार से इतना ही कहकर प्रपितामह देव ने त्रिशिखास्त्र अर्थात् आग्नेयास्त्र हाथ में रखने वाले से कहा था—हे विभो ! जो यह वक्त्र से समुद्भूत प्रभु हैं अर्थात विनायकों के नायक हैं ये उनके अनुगामीं होंगे। ।।२५।। मुख से समुद्भूत तुझ से आप अम्बर में चार शरीर धारी होगे। यह आकाश तुझसे बहुत प्रकारों से व्यवस्थित है और यही एक है इसके कहने वालों के वे सब अपयात हो जाँयगे ।।२६।। आप प्रतिमास्त्र पाणि से प्रभु हो जाइये और इन अस्त्रों को तथा वरों को दीजिए। बस, इतना ही कहकर पितामह के विनिर्गत हो जाने पर त्रिलोचन प्रभु ने अपनी आत्मा से जन्म ग्रहण करने वाले पुत्र से कहा था ।।२७।।

विनाय को विघ्नकरो गजास्यो गणेश नामा च भवस्य पुत्रः ।
एते च सर्वे त्वपयान्तु भृत्या विनायकाः क्रूरदृशः प्रचण्डाः ।।२८
उच्छुष्मदानादि विवृद्ध देहाः कार्येषु सिद्धिः प्रतिपादयन्तः ।
भवांश्च देवेषु तथा मखेषु कार्येषु चान्येषु महानुभावान् ।।२९
अग्रे तु पूजां लभतेऽन्यथा च विनाशयिष्यस्यथ काय सिद्धिम् ।
इत्येव मुक्त्वा परमेश्वरेण सुरैः समं कांचन कुम्भ संस्थैः ।।३०

Digitization by Arya Samaj Charitable Foundation, Chennai

जलैस्तथासावभिषिक्त गात्रोरराज राजेन्द्र विनायकानाम् ॥३१
दृष्ट्वाभिषिच्यमानं तु देवास्तं गणनायकम् ।
तुष्टु वुः प्रयताः सर्वे त्रिशूलास्त्रस्य सन्निधौ ॥३२
नमस्ते गजवक्ताय नमस्ते गण नायक ।
विनायक नमस्तेऽस्तु नमस्ते चण्डविक्रम् ॥३३
नमोऽस्तुते विघ्नकर्त्रे नमस्ते सर्पमेखल ।
नमस्ते रुद्रवक्तोत्थ प्रलम्ब जठराश्रित ।
सर्व देव नमस्कारादविघ्नं कुरु सर्वदा ॥३४

विनायक—विघ्न कर—गज वदन—गणेश नाम धारी शम्भु के पुत्र—ये सब क्रूर द्रष्टि वाले—प्रचण्ड—मृत्य विनायक सब अपमान करें। अर्थात् यहाँ से दूर चले जावें। उच्छुष्म दानादि से पिवृद्ध देहों वाले—कार्यों में सिद्धि का प्रतिपादन करते हुए हैं। और आप देवगणों में तथा मखों में और अन्य कार्यों में महानुभाव के यहाँ आप सबसे आगे पूजा का लाभ प्राप्त करते हैं अर्थात् सबके पहिले गणेश जी ही पूजित किये जाते हैं। यदि इनकी सबसे प्रथम पूजा नहीं होती है तो यह कार्यों की सिद्धि का विनाश कर देंगे। अर्थात् बिना प्रथम गणेशजी की पूजा के कार्यों की सिद्धि को यह नष्ट कर दिया करेंगे। इतना यह ही इस प्रकार से कहकर हे राजेन्द्र ! सुवर्ण के कलशों के सहित संस्थित सुर-गणों के साथ जलों से अभिषिक्त होकर गज मुख शोभित हुये थे। और विनायकों के प्रमुख बनाये गये थे ॥२८—३१॥ अभिषेक किये हुए गण नायक का दर्शन करके देवों ने भगवान् शंकर की सन्निधि में सब ने प्रपत होकर उन गणेश जी की स्तुति की थी ॥३२॥ हे गज के समान मुख वाले ! आपकी सेवा में हमारा सबका नमस्कार है। हे गणों के नायक ! आपको हमारा प्रणाम है। हे विनायक ! आपके लिये हमारा प्रणाम है। हे चण्ड विक्रम वाले आपको नमस्कार हैं ॥३३॥ हे विघ्नों के करने वाले ! आपके लिये प्रणाम है। आप सर्पों की मेखला धारण

Digitization by Arya Samaj Charitable Foundation, Chennai

किये हैं आपको हमारा नमस्कार है हे रुद्र वक्त्र ! आपको नमस्कार है तो लम्बे जठर से आश्रित हैं। आप हम सब देवों के आप नमस्कार से सर्वदा विघ्नों का अभाव कीजिये ॥३४॥

एवं स्तुतस्तदा देवैर्महात्मा गणनायकः ।
अभिषिकस्तु रुद्रेण सोमयाऽपत्यताङ्गतः ॥३५
एतच्चतुर्थ्यां सम्पन्नं गणाध्यक्षस्य पार्थिव ।
यतस्ततोऽयं महती तिथीनां परमातिथिः ॥३६
एतस्यां यस्तिलान् भुक्त्वा भक्त्या गणपतिं नृप ।
आराधयति तस्याशु तुष्यते नात्र संशयः ॥३७
यश्चैतत्पठति स्तोत्रं यश्चैतच्छृणुयात्सदा ।
न तस्य विघ्ना जायन्ते न पापं सर्वथा नृप ॥३८

इस प्रकार से उस समय में वे महान आत्मा वाले गणनायक देवों के द्वारा स्तवन किये गये थे। रुद्र देव के द्वारा अभिषिक्त होकर वे उमादेव की अपत्यता को प्राप्त हुए थे अर्थात् उमा की सन्तति हो गए थे ॥३५॥ हे पार्थिव ! यह सब कार्य कलाप गणाध्यक्ष का चतुर्थी तिथि में ही सम्पन्न हुआ था। तभी से यह चतुर्थी तिथि अन्य तिथियों में सबसे अधिक महत्त्व वाली हो गई थी ॥३६॥ हे नृप ! इस चतुर्थी तिथि में जो तिलों का भोजन करके भक्ति की भावना से भगवान् गणपति की आराधना किया करता है उस पर भगवान् गणपति बहुत ही शीघ्र प्रसन्न हो जाया करते है—इसमें कुछ भी संशय नहीं है ॥३७॥ जो पुरुष इस स्तोत्र का पाठ किया करता है और जो कोई इस का श्रवण किया करता है तब फिर उस पुरुष के लिए कभी भी विघ्न नहीं हुआ करते हैं। हे नृप उस पुरुष को कभी भी पाप भी बिल्कुल नहीं हुआ करता है ॥३८॥

Digitization by Arya Samaj Charitable Foundation, Chennai

२४--सर्पों की उत्पत्ति

श्रुत्वा गणपतेर्जन्म प्रजापालो नराधिपः ।
उवाच श्लक्ष्णया वाचा तं मुनिं शंसित व्रतम् ॥१
भगवंस्ताक्ष्यविषयाः कथं मूर्तिमुपागताः ।
नागा बभूव कुटिला एतदाख्यातुमर्हसि ॥२
सृजता ब्रह्मणा सृष्टिं मरीचे सूतिकारणम् ।
प्रथमं मनसा ध्यातस्तस्य पुत्रस्तु कश्यपः ॥३
तस्य दाक्षायणी भार्या कद्रूः नाम शुचिस्मिता ।
मारीचो जनयामास तस्यां पुत्रान्महा बलान् ॥४
अनन्तं वासुकिं चैव कम्वलं च महावलम् ।
कर्कोटकं च राजेन्द्र पद्मं चान्यं सरीसृपम् ॥५
महापद्मं तथा शंखं कुलिकं पापराजिलम् ।
एते कश्यपदायादाः प्रधानाः परिकीर्त्तिताः ॥६
एतेषां तु प्रसूत्या तु इदमापूरितं जगत् ॥७

प्रजापालक नराधिप ने भगवान् गणपति के जन्म का समाचार श्रवण करके उसने शंसित व्रत वाले उन मुनीश्वर से अधिक भाक्षण वाणी से कहा था ॥ १ ॥ हे भगवन् ! ताक्ष्य के विषय किस प्रकार से मूर्त्ति के स्वरूप में प्राप्त हुए थे । नाम कुटिल हुए थे—कृपा करके यह अब आप बतलाने के योग्य होते हैं ॥ २ ॥ सृष्टि के सृजन करते हुए ब्रह्माजी के द्वारा मरीचि को ही प्रसब का कारण बनाया था । सबसे प्रथम उन्होंने मनसे ध्यान किया था और उसके पुत्र कश्यप हुए थे ॥ ३ ॥ उन कश्यप ऋषि की एक भार्या दाक्षायणी रुद्र थी जो शुचि स्मित्वा वाली थी । मारीच ने अर्थात् कश्यप जी ने उस रुद्र में महान् बलवान् पुत्रों को जन्म ग्रहण कराया था ॥ ४ ॥ उनके नामों का परिगण न करके बताया जाता है—अनन्त नाम—वासु कि—कम्बल—महावल—

Digitization by Arya Samaj Charitable Foundation, Chennai

हे राजेन्द्र ! कर्कोटक—पद्म और अन्य सरीसृप—महा पद्म—शंख—कुलिक और पापराजिल—ये इतने कश्यप मुनि के पुत्र हुए थे जो प्रधान पुत्र हुए थे उनको हो यहाँ पर कहा गया है ।। ४ ।। ५ ।। ६ ।। इनकी ही इतनी अधिक सन्ततियाँ हुई थी जिनसे यह सम्पूर्ण जगत् आपूरित कर दिया है ।। ७ ।।

कुटिला हीनकर्माणस्तीक्ष्णास्योत्थ विषोल्बणाः ।
दृष्ट्वा सन्दश्य मनुजान् भस्म कुर्युः क्षणाद् ध्रुवम् ।।८
शब्दगामी यथा स्पृशो मनुष्याणां नराधिप ।
अहन्य हनि जायेत क्षयः परम दारूणः ।।९
आत्मनस्तु क्षवं दृष्ट्वा प्रजाः सर्वाः समन्ततः ।
जग्मुः शरण्यं शरणं परं तु परमेश्वरम् ।।१०
इममेवार्थमुदिदृश्य प्रजाः सर्वा महीपते ।
ऊचुः कमल जन्मै वं पुराणं ब्रह्म संज्ञितम् ।।११
त्राहि नस्तीक्षण दंष्ट्रेभ्यो भुजंगेभ्यौ महाबल ।
अहन्यहनि ये देव पश्येयुरुरगां दृशा ।।१२
मनुष्य मृगयू थं वा तत्सर्वं भस्मसाद्भवेत् ।।१३
त्वया सृष्टिः कृता देव लीयते सा भुजङ्गमैः ।
एतज्ज्ञावा तु दुर्वत्तं तत्कुरुष्व महामते ।।१४

ये सब परम कुटिल थे और हीन कर्मों वाले थे। इनके परम तीक्ष्ण मुख महान् उल्कण बिषय निकला करता था। ये मनुष्यों को देखकर ही काट लिया करते थे और एकही क्षण में अपने विष से उनको भस्म कर दिया करते थे। यह निश्चित ही इनका प्रभाव था ।। ८ ।। हे नराधिप ! ये मनुष्यों को शब्द गामी स्पर्श वाले थे। ये दिन प्रतिदिन में समुत्पन्न होता है और इनका क्षय परम दारुण है ।। ९ ।। अपना दिनों दिन क्षय देखकर सब ओर सभी प्रजा चिन्तित हो गई थी और वे सब शरण्य—परम परमेश्वर की शरणा गति पें प्राप्त हुए थे ।। १० ।।

Digitization by Arya Samaj Charitable Foundation, Chennai

हे महीपते ! इसी अर्थ का उद्देश्य लेकर समस्त प्रजा ने कमल से जन्म धारण करने वाले पुराण ब्रह्म की संज्ञा वाले पुत्र से प्रार्थना की थी—उन्होंने कहा था—हे महाव्रत ! आप तीक्ष्ण दाढ़ों वाले भुजङ्गमों से इस समय में हमारी रक्षा कीजिए। आये दिन इन उरगों को दृष्टि से देखते हैं जो भी हे देव ! देखता है चाहे वह मनुष्य हों या मृगों का यूथ हो वह सभी भस्म सात् हो जाया करते हैं ॥ १३ ॥ हे देव ! आपने तो यह सृष्टि की रचना की है और वह सम्पूर्ण सृष्टि भुजङ्गों के द्वारा लीन की जाती है। आप इस बुरे वृक्ष को जानकर हे महामते ! अब आप रक्षा कीजिए ॥ १४ ॥

अहं रक्षां विधास्यामि भवतीनां न संशयः।
व्रजध्वं स्वानि धिष्णानि प्रजा गाला: ससध्वसाः ॥१५
एवमुक्तास्तु जग्मस्ते ब्रह्मणा व्यक्त मूर्तिना।
आगतासु प्रजास्वाद्यस्तानाहूय भुजङ्गमान्।
शशाय परमक्रुद्धो वासुकि प्रमुखांस्तथा ॥१६
यतो मतप्रभवान्नित्यं क्षयं नयम मानुषान्।
भवान्तरे अथान्यस्मिन्मातुः शायात सुदारुणात ॥
भवितातिः क्षयो घोरो स्वायम्भुवेऽन्तरे ॥१७
एवमुक्तास्तु वेपन्तो ब्रह्मणा भुजगोत्तमाः।
निपत्य पादयोस्तस्य इदमूचुः वचस्तदा ॥१८
भगवन् कुटिला जातिरस्माकं भवता कृता।
विषोल्वणत्वं क्रूरत्वं दृक्शस्त्रत्वं नोऽव्ययाम।
सम्पादितं त्वया देव इदानीं शमयाच्युता ॥१९
यदि नाम मया सृष्टा भवन्तः कुटिलाशयाः।
ततः भि मनुजान्नित्तं भक्षयध्वं गतव्यथा ॥२०
मर्यादाः कुरु देवेश स्थानं चैव पृथक् पृथक् ॥२१

ब्रह्माजी ने कहा था—आप सबकी मैं रक्षा करूंगा—इसमें कुछ भी संशय मत करो। अब आप अपने २ गृहों को जाइए आप प्रजा

Digitization by Arya Samaj Charitable Foundation, Chennai

पाल भयभीत हैं। प्रकट मूर्त्ति वाले ब्रह्माजी के द्वारा इस प्रकार से कहे गये वे सब निवासों को चले गये थे। प्रजाओं के आगत हो जाने पर आद्य देव ब्रह्माजी ने उन सब भुजङ्गमों को बुलाया था तथा परम क्रुद्ध होकर उन्होंने वासुकि जिनमें प्रधान था शाप दे दिया था। क्योंकि आप लोग मेरे द्वारा समुत्पन्न हुए मनुष्यों को क्षय किया करते हैं। इस संसार के अन्दर अन्य जन्म में माता के सुदारुण शाप से आपका अत्यन्त ही घोर क्षय इस स्वायम्भुव के अनन्तर में हो जायगा।। १५ ।। १६ ।। १७ ।। ब्रह्माजी के द्वारा इस तर हसे कहे गये वे भुजंगोत्तम काँपते हुए उनके चरणों में गिर गये थे और उस समय में वे यह वचन कहने लगे थे ।। १८ ।। हे भगवन् ! हमारी कुटिल जाति तो आपने ही की है। हममें आपने ही विष से उल्वण होना—क्रूरता—दृष्टि का शत्रु वाला होना—जो अविनाशी है। हे देव ! आपने ही सम्पादित किया है। हे अच्युत देव ! इस समय में आप शमन कीजिए ।। १९ ।। ब्रह्माजी ने उन सूर्यों से कहा था कि यदि मैंने ही इन सबका सृजन आप लोगों में किया है तो क्या इसका यह अभिप्राय है कि आप लोग नित्य ही व्यथा रहित होते हुए मनुष्यों का भक्षण अर्थात् दशन किया करें। सर्पों ने प्रार्थना की थी—हे देवेश्वर ! इसकी कोई मार्यादा कीजिए और पृथक् पृथक् स्थान भी कर दीजिए ।। २० ।। २१ ।।

नागानां वचनं श्रुत्वा देवोवचनमब्रवीत् ।
अहं करोमि वो नागाः समयं मनुजैः सह ।।२२
तदेक मनसः सर्वे श्रृणुध्वं मम शासनेम् ।
पातालं वितलं चैव सुतलाख्यं तृतीयकम् ।।२३
दत्तं वै वस्तुकामानां गृहं तत्र गमिष्यथ ।
तत्र भोगान्बहुविधा न्भुंजाना मम शासनात् ।।२४
तिष्ठध्वं सप्तमं या वद्रात्र्यन्तं मे पुनः पुनः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

ततो वै वस्वतस्यादौ काश्यपेया भविष्यथ ।।२५
दायादा सर्वं देवानां सुपर्णस्य च धीमतः ।
तदा प्रसूतिर्वः सर्वा भोक्ष्यते चित्रभानुना ।।२६
भवतां नैव दोषोऽयं भविष्यति न संशयः ।
ये वै क्रूरा भोगिनो दुर्विनीतास्तेषमन्तो भविता नान्यथैतत् ।।२७
काल प्राप्तं भक्षयध्वं दशध्वं तथाऽपकारे च कृते मनुष्यात् ।।२८

नागों के इस वचन का श्रवण करके देव ने कहा—हे नागो ! मैं मनुष्यों के साथ आपका समझौता कर दूंगा ।। २२ ।। वही अब आप लोग परम समाहित होकर मेरे शासन का श्रवण कीजिए। मैंने आप लोगों को जो भी निवास करने की इच्छा रखते हैं उन सबको पाताल—वितल और सुतल ये बीच चेके लोक दे दिये हैं। वहाँ पर ही आप सबका गृह होगा। अतएव आप सब वहीं पर गमन करिए। मेरे शासन से वहाँ पर अनेक प्रकार के भोगों का उपभोग करते हुए निवास कीजिए। आप लोग वहाँ पर मेरी जब तक सप्तम रात्रि होवे ठहरिए और इसके उपरान्त वैवस्वत मन्वन्तर के आदि काल में आप पुनः काश्यपेय अर्थात् कश्यप की सन्तान होंगे ।।२३—२५।। आप लोग सभी देवों के दामाद हैं और श्रीमान् सुहर्ण के दामाद हैं। उस समय में आपकी सम्पूर्ण प्रसूति चित्रभानु के द्वारा भोक्ष्यमाण होती है ।।२६।। यह आपका कोई दोष नहीं होगा—इसमें संशय नहीं हैं। जो भी पर-माधिक क्रूर भोगी हैं और अत्यन्त ही दुर्निनीत हैं उनका ही अन्त होगा अन्यथा यह नहीं होगा ।। २७ ।। काल के प्राप्त होने पर तथा कुछ उपकार करने पर आप मनुष्यों का भक्षण करिए तथा दंशन भी करिए ।।२८।।

मन्त्रौषधैर्गारुडमण्डलैश्च वर्द्धदंष्टैर्मानवाये चरंति ।
तेषां भीतैर्वर्तितव्यं न चान्याच्चिन्त्यं कार्यं चान्यथा वो विनाशः ।।२९

Digitization by Arya Samaj Charitable Foundation, Chennai

इतीरिता ब्रह्मणा ते भुजङ्गा जग्मु: स्थानं क्ष्मातलाख्यं हि सर्वे ॥३०

एवं शापं ते तु लब्ध्वा प्रसादं च चतुर्मुखात् ।
तस्थु: पाताल निलयं मुदितेनान्तरात्मना ॥३१
एतत सर्वं च पंचम्यां तेषां जातं महात्मनाम् ।
अत: प्रिया तिथिर्धन्या सर्वपाप हरा शुभा ॥३२
एतस्यां संयतो यस्तु अम्लं तु परिवर्जयेत् ।
क्षीरेण स्नापयेन्नागांस्तस्य यास्यन्ति मित्रताम् ॥३३

मन्त्रों से—औषधों से—गारुड़ मण्डलों से वृद्धों तथा दृष्टों से जो मनुष्य चरण किया करते हैं उनसे आप लोगों को भीत होकर ही वरताव करना चाहिए। अन्य से नहीं कार्य का चिन्तन करना चाहिए। यदि इसके विपरीत करेंगे तो आपका विनाश होगा ॥२६॥ इस तरह से ब्रह्माजी के द्वारा कहे हुए वे सब भुजङ्ग रसातल नामक स्थान को चले गये थे। इस तरह से उन्होंने चतुर्मुख से शाप प्राप्त किया था और फिर प्रसन्नता भी प्राप्त की थी। वे सब परम हर्षित आत्मा वाले हुए पाताल के निलय अर्थात् गृह में स्थित हो गये थे। यह सभी कार्य उन महात्माओं का पञ्चमी तिथि में सम्पन्न हुआ था। अतएव वह पञ्चमी तिथि उनकी परम प्रिय और धन्य है तथा शुभ है। और सब पापों के हरण करने वाली है जो पुरुष इस तिथि में परम संयत होकर अम्ल पदार्थ का परिवर्जन कर देता है और दूध से नागों का स्तवन कराया करता है उसके साथ नागगण मित्रता को प्राप्त हो जांयगे ॥ ३०—३३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

२५–कार्तिकेय की उत्पत्ति

अहंकारात्कथं जज्ञे कार्त्तिकेयो द्विजोत्ताम ।
एतन्मे संशयं छिन्धि पृच्छतो वै महामुन ।।१
सर्वेषामेव तत्त्वानां यः परः पुरुषः स्मृतः ।
तस्मादव्यक्तमुत्पन्नं तत्त्वादि त्रिविधं तु तत् ।।२
पुरुषाव्यक्तयोर्मध्ये महत्त्वं समपद्यत ।
स चाहङ्कार इत्युक्तो यो महान्समुदाहृतः ।।३
पुरुषो विष्णुरित्युक्तः शिवो व नामतः स्मृतः ।
अव्यक्तं तु उमादेवी श्रीर्वा पद्मनिभेक्षणा ।।४
तत्संयोगादहङ्कारः स च सेनापति र्गुहः ।
तस्योत्पत्तिं प्रवक्ष्यामि शृणु राजन्महामते ।।५
सृष्ट्यां विस्तारितायां तु देव दैत्या महावलाः ।
सात्वतं भावमास्थाय युयुधुर्विजिगीषवः ।।६
दैत्यानां बलिनः सन्ति नायका युद्धदुर्मदाः ।
हिरण्यकशिपुः पूर्वं हिरण्याक्षो महासुरः ।।७

हे द्विजो में परम उत्तम ! स्वामी कार्त्ति केम प्रभु अहङ्कार से कैसे समुत्पन्न हुए थे ? मेरे हृदय में यह बड़ा भारी संशय हो रहा है कृपा करके इस संशय का छेदन कर दीजिए । हे महामुने ! मैं आपसे यही पूछ रहा हूँ ।१। सभीतत्वों का जो परम पुरुष कहा गया है ब्रह्म से ही अव्यक्त की उत्पत्ति हुई थी । वह तत्त्व आदि से तीन प्रकार का है ।।२।। पुरुष और अव्यक्तके मध्य में महत् समुद्भूत हुआ था । और वह अहंकार-इस नाम से कहा गया है जो कि महान् समुदाहृत किया गया है ।।३।। जो पुरुष है वही विष्णु कहा गया है अथवा शिव—-इस नाम ने कहा गया है । जो अव्यक्त है वही उमा देवी हैं अथवा पद्म के समान लोचनों वाली श्री देवी है । उसके संयोग से अहंकार उत्पन्न हुआ था जो सेनापति गुह है ।

Digitization by Arya Samaj Charitable Foundation, Chennai

हे महामने ! राजन् ! मैं अब उसकी उत्पत्ति को बतलाऊँगा । आप इसका श्रवण कीजिए ॥४॥५॥ सृष्टि के विस्तृत हो जाने पर महान् बलवान् देवगण और दैत्य सात्त्वत भाव में आस्थित होते हुए होकर जीतने की इच्छा वाले परस्पर में युद्ध करने लगे थे ॥६॥ दैत्यों में बलवान् युद्ध में दुर्मद नामक हैं । पूर्व में हिरण्य कशिपु हुआ था और और महासुर हिरण्याक्ष हुआ था ॥७॥

विप्रचित्तिः विचित्रस्तु भीमाक्षः क्रौंच एव च ।
एतेऽतिबलिनः शूरा देव सैन्यं महामृधे ॥८
अमरांश्च शितैर्वाणैः जयन्त्यनुदिनं मृधे ।
तेषां पराजयं दृष्ट्वा देवानां च बृहस्पतिः ॥६
मुवाच हीनं वै सैन्यं नायकेन विना सुराः ।
एकेनेन्द्रेण दिव्यं तु सैन्य पातु न शक्यते ॥१०
अतः सेनापतिं कञ्चिदन्वेषयत मा चिरम् ।
एवमुक्तास्ततो देवा जग्मुर्लोकपितामहम् ॥११
सेनापतिं च नो देहि वाक्यमूचुः स सम्भ्रमम् ।
ततो दध्यौ चतुर्वक्तृः किमेषां क्रियते मया ॥१२
ब्रह्मणश्चिन्त्यमानस्य रुद्रं प्रति मनो गतम् ।
ततो देवाः सगन्धर्वा ऋषयः सिद्ध चारणाः ॥१३
ब्रह्माणं पुरतः कृत्वा जग्मुः कैलास पर्वतम् ।
तत्र दृष्ट्वा महादेवं शिवं पशुपतिं विभुम् ।
तुष्टुवुः विविधैः स्तोत्रैः शक्राद्यास्त्रि दिवौक सः ॥१४

विप्र चित्ति—विचित्र--भीमाक्ष और कौञ्च—ये अति बल-वान् शूर हुए थे । महान् युद्ध में देवों की सेना को और देवों को युद्ध में तीक्ष्ण वाणों के द्वारा आये दिन जीत लिया करते थे । वृहस्पति ने इन देवों की पराजय को देखकर बोले थे ॥८॥६॥ हे सुरो ! नायक से हीन आपकी सेना है अर्थात् आपकी सेना का कोई भी सेनापति नहीं

Digitization by Arya Samaj Charitable Foundation, Chennai

है। इन्द्र एक ही है उसके द्वारा यह दिव्य सेना रक्षित नहीं की जा सकती है ।।१०।। इसीलिये सेना के लिये किसी सेनापति का अन्वेषण कीजिए और इस कार्य में विलम्ब मत कीजिए। इस प्रकार से जब देवों से कहा गया था तो वे सव देवगण देवेश्वर पितामह के समीप में गये थे ।।११।। उन सबने सम्भ्रम के साथ ब्रह्माजी से कहा था--हे देव ! आप हमको कोई सेनापति हमारी सेना के लिते प्रदान कीजिए। इसके अनन्तर ब्रह्माजी ने विचार किया था कि मुझे इन देवों के लिए क्या करना चाहिए।१२। इसप्रकार से चिन्तन करते हुए ब्रह्माजी का मन शिवजी की ओर गया था। इसके अनन्तर सब देवगण—गन्धर्व—ऋषिगण—सिद्ध और चारण सब ब्रह्माजी को अपना अगुअ बना कर कैलास पर्वत पर गए थे। वहाँ पर उन सबने महादेव—शिव—विभु और पशुपति का दर्शन किया था इन्द्र आदि समस्त देवों ने अनेक स्तोत्रों के द्वारा उन का स्तवन किया था ।।१३।।१४।।

सेनापतिं च देवेश देवेश देहि दैत्यवधाय वै।
देवाना ब्रह्ममुख्यानामेतदेव हितं भवेत् ।।१५
ददामि सेनानाथं वो देवा भवत विज्वराः।
भविष्ममस्ति पौराणां योगाद नामचिन्तयत् ।।१६
एवमुक्त्वा हरो देवान्विसृज्य स्वाङ्गसंस्थिताम्।
शक्तिं संक्षोभयामास पुत्रहेतो परन्तप ।।१७
तस्य क्षोभयतः शक्ति ज्वलनाकसमप्रभः।
